114-118. Brought down by your honour for doing favour to the Madras, it is the goddess Umā who is famous on the earth as Devikā and by seeing whom a man certainly becomes purified in this world. (There are) Indramārga, Somatīrtha, the holy Ambujana, Suvarṇabindu, the auspicious abode of Hara, the sin-destroying abode of Skanda, the highly sacred lord of Umā at Rudratīrtha, Durgādvāra, possessed of holy water, Koṭitīrtha, the sacred place of Rudra, Kamākhya and Puṣpanyāsa. O honour-giver, (there is) Haṃsapada pronounced as holy and so also Ṛṣirūpa.

सर्वत्र[4] देविकातीर्थं क्षेत्रं क्रोशचतुष्टयम् ।
यत्र कूपतटाकाख्यं[5] पुण्यं[6] सर्वमशेषतः ॥ ११९ ॥

119. In the area extending over four krośas, there is Devikātīrtha at all the places where every well and pool is holy in all respects.

आपगा च नदी पुण्या तौषी तोषितभास्करा ।
चन्द्रांशुशीतलजला चन्द्रभागा सरिद्वरा ॥ १२० ॥

120. (There is) the sacred river Āpagā and the holy Tauṣī which pleases the sun. There is the Candrabhāgā—

---

1. These two pādas occur after first and second Pādas of 118 in E These two pādas are written by a different hand on right margin of H.
2. ऋषिकूपं DE·
3. भानदं H.
4. सर्वतो C
5. कूपतडागाख्यं D, कूपतडाख्यं तु H.
6. पुण्यतीर्थम् C

Ed. Leiden v.v. 113b-116

the best of the rivers—whose water is cool like the rays of the moon.

पुण्यं वै[1] चन्द्रभागायास्तीर्थं वैवट्टिलामुखम्[2] ।
शंखमर्दलनामा[3] च तथा पापनिसूदनः ॥ १२१

121. Vaivaṭiṭlāmukha is the meritorious holy place of the Candrabhāgā and so also is the sin-destroying Śaṅkhamardala.

गुह्येश्वरः[4] शतमुख इष्टिकापथ[5] एव च ।
कदम्बेशस्तथा पुण्यः क्षेत्रं चैव समन्ततः ॥ १२२ ॥

122. (There are) Guhyeśvara, Śatamukha, Iṣtikāpatha, the holy Kadambeśa and the area around it.

यावच्छतमुखं तीर्थं यावत्तीर्थं गुह्येश्वरम्[6] ।
तावत्[7] क्षेत्रं समं[8] पुण्यं वाराणस्याथवाधिकम्[9] ॥ १२३ ॥

123. The area extending from the holy Śatamukha upto the holy place Guhyeśvara, is equal, in holiness, to Vārāṇasī or is even higher than that.

---

1. Thus A, च Other Mss.
2. वैवाट्टिकामुखं CH, वैवांगिलामुखां D, वैवेंगिलामुखं EF
3. शंखमर्दननामा C, शंखमदलनामा F
4. Thus C, गुदेश्वरः Other Mss.
5. इष्टि का पर्वं EH, इष्ठिका पथ C
6. Thus C, गुदेश्वरम् AH
7. इदं H
8. इदं C, इमं G
   Emended from
9. वाराणस्या यवाधिकम् AFH, वाराणस्यां शताधिकम् C

Ed Leiden v.v. 117-119

सर्वत्रैव सदा पुण्या चन्द्रभागा[1] महानदी ।
माघशुक्लत्रयोदश्यां पुष्ययोगे विशेषतः[2] ॥ १२४ ॥

124. The great river Candrabhāgā is always holy everywhere but is specially so on the thirteenth of the bright half of Māgha in conjunction with Puṣya.

पृथिव्यां यानि तीर्थानि[3] ह्यासमुद्रसरांसि[4] च ।
चन्द्रभागां गमिष्यन्ति[5] माघशुक्लत्रयोदशीम्[6] ॥ १२५ ॥

125. All the sacred places on the earth, includiug the seas and the lakes, shall go to the Candrabhāgā, on the thirteenth of the bright half of Māgha.

पुण्यं वस्त्रापथंप्रोक्तं देवश्च[7] छागलेश्वरः[8] ।
द्वितीया च तथा भौमी[9] तस्याः प्रभव[10] एव च[11] ॥ १२६ ॥

---

1. F gloss चन्द्रभागाक्षौ (ख्यौ) चन्द्रादित्यकुण्डौ हिमालयगह्वरे तदुभयोत्पन्नत्वात् चन्द्रभागा ।
2. F gloss. माघशुक्लत्रयोदश्यां महापुण्यापि तिष्ययोगे विशेषतोतिपुण्यफलदेत्यर्थः F
3. तीर्थाणि H
4. Om. F, चासमुद्रं सरांसि च C, स्यासमुद्रसरांसि च ed. Leiden
5. समायान्ति C
6. माघपुष्यत्रयोदशीम् DF, माघपौष्यत्रयोदशीम् E
7. देवं GF
8. Thus emended by K. D. Vreese ed. Leiden. छगलेश्वर C, कमलेश्वरं A, भगलेश्वरं DEF, फागलेश्वरम् G, देवं च छागलेश्वरम् H
9. Thus DF, द्वितीया च तथा भौमे EG, द्वितीयायां तथा भौमे AC
10. प्रभावम् G
11. तस्योत्पत्तिः समीरिता C

Ed. Leiden v.v. 120-122

126. Vastrāpatha is stated to be holy and so also the god Chāgaleśvara, the second Bhaumī and also her birth place.

सतीदेहस्य[1] सरसस्तीर्थं विष्णुपदं सरः ।
क्रमसारेति विख्यातं सर्वकल्मषनाशनम् ॥ १२७ ॥

127. The sacred place of the lake which is an incarnation of the body of Satī, is the lake Viṣṇupada famous Kramasāra, the destroyer of all the sins.

एतान्यन्यानि च मुने तीर्थान्यनुसराशु[2] वै[3] ।
येषां स्नानेन मुच्यन्ते पापात्मानोऽपि मानवाः[4] ॥ १२८ ॥

128. O sage, please visit immediately these and other holy places by bathing at which, even the evil-minded human beings are freed (from the sins).'

इत्युक्तः स तथेत्युक्त्वा नीलेन सहयायिना ।
जगाम तानि तीर्थानि[5] जातेहः[6] पूर्वमेव तु ॥ १२९ ॥

129. Bṛhadaśva (said) : Addressed thus he whose desire had already been aroused, said "Let it be so" and went to those holy places in the company of Nīla.

---

1. सतीदेशस्य A

2. Thus C, अनुसरांसि A, अनुसरामि E, some space left after नु in G
तीर्थाण्यनुसरस्तथा H

3. Thus EF, च A, वा G.

4. इति नीलमते कश्यपनीलसमागमवर्णनम् । बृहदश्वः add F, इति श्री नीलमतपुराणे कश्यपनील समागमवर्णनं नाम एकादशोऽध्यायः । बृहदश्व उवाच C, इति नीलमते । बृहदश्वः । H

5. तीर्थाणि H

6. ज्ञाताहः G F gloss ज्ञातिर्बन्धुर्नीलस्तस्येहाभिमतं यस्येति अथवा पूर्वमेव जातेह उत्पन्नाभिलाषः नीलेन प्रेरितः

Ed. Leiden v.v. 123-125

उत्तीर्य यमुनां देवीं तथा देवीं सरस्वतीम् ।
कुरुक्षेत्रं तथा दृष्ट्वा सन्नीतिर्यत्र विश्रुता ॥ १३० ॥

130. Having crossed the river-goddesses Yamunā and Sarasvatī, he visited Kurukṣetra where Sannīti is famous.

तीर्थसन्नयनश्चैव सन्नीतिर्भुवि कथ्यते ॥ १३१ ॥

पृथिव्यां यानि तीर्थानि[1]चासमुद्रंसरांसि च[2] ।
कृष्णपक्षावसाने वै[3] यत्र यान्ति सदानघ[4] ॥ १३२ ॥

131-132. O sinless, a multitude of the holy places is called Sannīti on the earth. It is, verily, the spot to which all the tīrthas including the seas and the lakes always go in the end of the dark half of the month.

श्राद्धं यः कुरुते तत्र राहुग्रस्ते दिवाकरे ।
अश्वमेधसहस्रस्य फलं प्राप्नोत्यनुत्तमम् ॥ १३३ ॥

133. He, who performs Śrāddha there at the time when the sun is eclipsed by Rāhu, obtains the best award of (performing) a thousand horse-sacrifices.

सन्नीतिं तां तथा[5] दृष्ट्वा चक्रतीर्थं[6] तथैव च ।
यदर्थं नारदोद्गीता गाथा चरति भूतले ॥ १३४ ॥

134. Having seen that Sannīti, (he saw) Cakratīrtha also about which a verse sung by Nārada is current on the earth.

---

1. तीर्थाणि H
2. आसमुद्रसरांसि च ed Leiden
3. तु EFH
4. F gloss. तीर्थसन्नयनमेव विशदयति पृथिव्यामिति कृष्णपक्षावसानेऽमायामित्यर्थः
5. तदा C
6. शक्रतीर्थं G

अहो लोकस्य निर्बन्ध[1]मादित्यग्रहणं प्रति ।
चक्रतीर्थेन पर्याप्तं[2] ग्रहा[3]द्दशगुणं फलम् ॥ १३५ ॥

135. "Oh ! the persistence of the people for the sun-eclipse ! The religious merit obtained at Cakratīrtha is ten times more than the eclipse.

तं[4] दृष्ट्वा चक्रतीर्थाख्यं[5] तथा तीर्थं पृथदकम्[6] ।
दृष्ट्वा विष्णुपदं पुण्यं तथा चामरपर्पटम्[7] ॥ १३६ ॥

136. Having visited the sacred places called Cakra and Pṛthūdaka, he saw the holy Viṣṇupada and Amaraparpaṭa.

शतद्रुं तत्र चोत्तीर्य[8] ऋषि[9]र्गङ्गां[10] च निम्नगाम् ।
अर्जुनाश्रमासाद्य देवसुन्दं तथैव च ॥ १३७ ॥

137. Afterwards, having crossed the rivers Śatadru and Gaṅgā, the sage reached Arjuna's hermitage and Devasunda.

उत्तीर्य च महाभागां विपाशां पापनाशिनीम् ।
दृष्ट्वान् सकलं देशं तदा शून्यं स कश्यपः[11] ॥ १३८ ॥

---

1. निर्बन्धः
2. पर्याप्तो
3. यतो C
4. तद् C
5. चक्रतीर्थाकिं C
6. पृथोदकम् G
7. चामरकण्टकम् C चामरपन्पटम् D
8. Thus D, शतद्रुं च ततस्तीर्त्वा C, च तथोत्तीर्य H, च ततोत्तीर्य A तत्रोत्तीर्य शतद्रुं च E ;
9. मुनिः C
10. श्रृंगां G श्रृंगं H
11. Occurs twice in A, once placed within brackets.

Ed. Lieden v.v. 130-133

138. Having crossed the illustrious and sin-destroying Vipāśā, Kaśyapa saw the whole country desolate at that time.

दृष्ट्वा स मद्रविषयं शून्यं प्रोवाच पन्नगम् ।
किमर्थं नील देशोऽयं मद्राणां शून्यतां गतः ॥ १३९ ॥

रमणीयः सदैवैष दुर्भिक्षपापवर्जितः ।
नित्यं धान्यधनोपेतस्तन्ममाचक्ष्व पृच्छतः[1] ॥ १४० ॥

139-140, Seeing the country of the Madras as desolate, he spoke to the Nāga, "O Nīla, tell me—the inquirer—as to why this country of the Madras has been deserted? This has always been charming, devoid of the calamity of famine and full of the wealth of grains!"

नीलः[2]

भगवन् विदितं सर्वं[3] यथा पूर्वं मया शिशुः ।
पालितः सङ्ग्रहसुतो दैत्यो नाम[4] जलोद्भवः ॥ १४१ ॥

141. Nīla said : "O venerable one, all this is known to you that formerly a demon-child named Jalodbhava—the son of Saṅgraha—was reared up by me.

सोऽद्य[5] लब्धवरः[6] पापो ब्रह्मणोऽव्यक्तयोनितः[7] ।
न मां गणयते धृष्टो[8] न चाहं[9] तस्य निग्रहे ॥ १४२ ॥

1. occurs after 141 a in E, इति श्री नीलमते add H
2. उवाच add BCDEF
3. Thus BCDF, पूर्वं AGH
4. नाम्ना AC
5. सद्यो G
6. Thus A, लब्ध्वा वरान् other Mss.
7. अव्यक्तजन्मनः G
8. Thus A, दुष्टो Other Mss.
9. तदार्थं DEF

Ed. Leiden v.v. 134-137 a

समर्थो वरदानेन त्रैलोक्याधिपतेः प्रभोः ॥ १४३ ॥

142-143. Now that impudent fellow, who obtained boons from Brahmā of imperceptible birth, ignores me like anything and I am incapable of keeping him under control due to the boon of the lord of three worlds.

तेनेदं[1] सकलं[2] शून्यं[3] मद्रदेशं[4] कृतं प्रभोरुः[5] ।
खादता नरमांसानि दुष्टेनाकृतबुद्धिना ॥ १४४ ॥

144. By that villain of evil intellect—eater of human flesh—this whole country of the Madras has been depopulated.

दार्वाभिसार—गान्धार—जुहुण्डर[6]—शकाः खशाः ।
तङ्गणा[7] माण्डवाश्चैव[8] अन्तर्गिरि—बहिर्गिरी[9] ॥ १४५ ॥

एते वै मुख्यतस्तेन देशाः शून्यीकृताः[10] प्रभो ।
निग्रहे भगवंस्तस्य कुरु बुद्धिं जगद्धिताम् ॥ १४६ ॥

145-146. O lord, the countries rendered desolate by him are mainly Dārvābhisāra, Gāndhāra, Juhuṇḍara,[1] Antargiri,

---

1. तेनासौ C
2. सकलः C
3. शून्यो C
4. मद्रदेशो C
5. विभोकृतः C
6. जाहुण्डर D जहुंडार E
7. तंग न G
8. Thus D, मारुवश्चैव E, नाडव A
9. —गिरीन् AGH
10. शून्यकृता A

Bahirgiri and those of the Śakas, the Khaśas, the Taṅgaṇas and the Māṇḍavas. O venerable one, make up your mind to check him for the welfare of the world.

बृहदश्वः

एवमुक्त[1]स्तथेत्युक्त्वा स्नात्वा तीर्थेषु कृत्स्नतः[2] ।
आजगाम सतीदेशं[3] विमलं तत् सरोत्तमम्[4] ॥ १४७ ॥

147. Bṛhadaśva (spoke) : Addressed thus he said "Be it so" and after taking bath in the holy places all around, he came to that best limpid lake in the country of Satī.

तत्र स्नात्वा जगांमाशु ब्रह्मलोकं सनातनम् ।
पद्‌भ्यां चंक्रमणं[5] त्यक्त्वा स्व ऋद्ध्यैव[6] नरोत्तम ॥ १४८ ॥

148. O king, after taking bath there, he gave up walking on foot and went to the eternal world of Brahmā, merely by his own power.

नीलेन सहितः प्राया[7]न्नागराज्ञा[8] महात्मना[9] ।
तौ गत्वा ब्रह्मसदनं ववन्दतुररिन्दम ॥ १४९ ॥

देवं,[10] कमलयोनिं च संगत्या तत्र च[11] स्थितौ ।
वासुदेवेश्वरौ देवावनन्तं च महामतिम्[12] ॥ १५० ॥

---

1. उक्ते FG
2. संस्तुतः A
3. सतीदेशे D
4. तत्सरोवरम् C तन्य is corrected into तत्स in A
5. च क्रामणं G damaged in C
6. स्ववृद्ध्यैव F, स्वशक्त्यैव GC
7. प्रागात् C
8. नागराजेन C
9. धीमता C
10. एवं DEF
11. तं FH, नित्यं E
12 महापतिम् G

149-150. He went along with Nīla, the high-souled king of the Nāgas. O controller of the enemies, both of them reached the abode of Brahmā and made obeisance to the lotus-born god and the gods Vāsudeva, Īśvara and highly intelligent Ananta, who were present there by chance.

तै[1]स्तु[2] सम्पूजितौ[3] तत्र जलोद्भवविचेष्टितम् ।
कथयामासतुरुभौ ततो देवः पितामहः ॥ १५१ ॥

अवोचदेनं[4] नागेशम्[5]षिं चामितविक्रमम्[6] ।
नौबन्धनं प्रयास्यामो वयं चैतस्य[7] निग्रहे ॥ १५२ ॥

151-152. Honoured by them, these two told the activities of Jalodbhava (Water-born). Then the god Pitāmaha said to this Nāga-lord and the sage of unparalleled valour, "we shall go to Naubandhana to subdue him.

तत[8]स्तं केशवो देवो[9] घातयिष्यत्यसंशयम् ।
एतच्छ्रुत्वा हरिः प्रायात्तार्क्ष्येण परवीरहा ॥ १५३ ॥

153. Then the god Keśava will undoubtedly kill him. "Having heard this, Hari, the killer of the strong enemies, went (mounted on) Tārkṣya.

---

1. Thus other Mss. तौ A
2. चापि C
3. पूजितौ C
4. Thus A उवाचैनौ C उवाच देवो DFH
5. तथा नागं C, नागं तं DH नागेतम् F
6. चामिततेजसम् DEFH
7. च तस्य DEG द्राक्तस्य C, तस्य च H
8. एष C
9. साक्षाद् C

Ed. Lieden v.v. 145-147

तमन्वयाद् वृषारूढो हरो देव्या सहानघ[1] ।
हंसयानौ गतौ ब्रह्मा नागौ तौ मेघवाहनौ[2] ॥ १५४ ॥

154. O sinless, after him went Hara, mounted on the bull, along with his wife. Brahmā went mounted on the swan and the two Nāgas mounted on the cloud.

ऋद्ध्यैव[3] कश्यपः प्रायाच्छ्रुतवांस्तत् पुरंदरः[4] ।
ततो देवगणैः सार्धं स यातो यत्र केशवः ॥ १५५ ॥

155. Kaśyapa went by his supernatural power. Indra heard that and, in the company of the hosts of gods, went to that place where Keśava had gone.

यमोऽग्निर्वरुणो वायुः कुबेरो निर्ऋतिस्तथा[5] ।
आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥ १५६ ॥
अश्विनौ भृगवः साध्यास्तथैवाङ्गिरसः सुताः ।
ऋषयश्च महाभागा गन्धर्वाप्सरसां गणाः ॥ १५७ ॥
देवपत्न्यस्तथा[6] सर्वा देवानां याश्च मातरः ।
विद्याधरगणा यक्षाः सागराः सरितस्तथा ॥ १५८ ॥

156-158. Yama, Agni, Varuṇa, Vāyu, Kubera, Nirṛti, Ādityas, Vasus, Rudras, Viśvedevas and the hosts of Maruts; Aśvins, Bhṛgus, Sādhyas, the sons of Aṅgiras, the illustrious sages, Gandharvas, the hosts of heavenly maidens ; all the wives of the gods, the mothers of the gods, the hosts of Vidyādharas, Yakṣas, seas and rivers (all went there).

1. महानघ CD, मया corrected into सहा by same hand in F
2. नागस्तु मेघवाहनः DE
3. ततश्च G
4. परंधनः G
5. Thus E नैनृतस्तथा C, निन्दतिस्तथा D नृपतिस्तथा A
6. देवपितृगणा E

मकरेण ययौ गङ्गा कूर्मेण यमुना नदी[1] ।
वृषारूढा शतद्रूश्च[2] महिषेण[3] सरस्वती ॥ १५९ ॥

159. Gaṅgā went mounted on crocodile, Yamunā on tortoise, Śatadru on bull and Sarasvatī on buffalo.

अश्वारूढा विपाशा च गजारूढा इरावती[4] ।
सिंहेन चन्द्रभागा च सिन्धुर्व्याघ्रेण पार्थिव ॥ १६० ॥

160. O King! Vipāśā (went) mounted on horse, Irāvatī on elephant, Candrabhāgā on lion and Sindhu on tiger.

देविका गवयारूढा मृगेण[5] सरयूर्नदी ।
मन्दाकिनी मनुष्येण पयोष्णी[6] चाप्यजेन तु ॥ १६१ ॥

161. Devikā (went) mounted on wild ox, Sarayū on deer, Mandākinī on man and Payoṣṇī on goat.

नर्मदा च[7] मयूरेण सारंङ्गेणच[8] गोमती ।
गोदावरी च मेषेण तथा[9] हंसेन कम्पना ॥ १६२ ॥

162. O king, Narmadā (went) mounted on peacock, Gomatī on Sāraṅga deer, Godāvarī on sheep and Kampanā on swan.

---

1. यमुनापगा C
2. स्तु H
3. महिष्येण ed. Leiden
4. शरावती D त्विरावती C चेरावती F
5. मृगेन G
6. परोष्णी D परोस्नी E
7. च AC
8. तु FH
9. तदा H

बकेन गण्डकी[1] राजन् कावेरी[2] उष्ट्रगा तथा[3] ।
नक्रेणेक्षुमती पुण्या सीता पुण्या बलाकया[4] ॥ १६३ ॥

163. O king, Gaṇḍakī (went) mounted on he crane, Kāverī on camel, the holy Ikṣumatī on crocodile and the holy Sītā on she crane.

चमरेण च लौहित्यो वंक्षुः क्रोडेन सत्वरः ।
ह्लादिनी[5] जीवजीवेन ह्रादिनी[6] कुक्कुटेन च[7] ॥ १६४ ॥

164. Lauhitya (went) mounted on Camara deer, Vaṅkṣu—the fast going one—on Kroḍa (hog), Hlādinī on partridge and Hrādinī on cock.

पावन्यपि[8] तुरंगेण[9] शोणः सर्पगतस्तथा ।
मेघेन[10] कृष्णवेणी च भुवेणा शशकेन च ॥ १६५ ॥

165. Pāvanī (went) mounted on a horse, Śoṇa on a serpent, Krṣṇaveṇī on cloud and Bhuveṇā on hare.

---

1. वकेन गंडके D
2. कावीरी AFG कवीरी C, कावेर्युष्ट्रगा H
3. तथा repeated by mistake in A
4. सीता पुण्यबलाकया DE तथा सीता C
5. ह्रादिनी CH
6. ह्लादिनी CH
7. तु C
8. पार्वत्यपि G
9. Thus CE, तुलिंगेन DFGH
10. मेघेण G
11. कृष्णवेणा च C

एताश्चान्याश्च या नद्यः प्रययुर्वाहनैः स्वकैः ।
अनुजग्मु[1] र्जगन्नाथं[2] हरिं[3] युद्धदिदृक्षया[4] ॥ १६६ ॥

166. These and other rivers also went mounted on their respective mounts. All these, with a desire to see fight, followed the lord of the world.

नौबन्धनमथासाद्य केशवो वै व्यवस्थितः ॥ १६७ ॥

167. Having reached Naubandhana, Keśava, verily, took a firm stand.

देवानुयात्रानिनदं[5] श्रुत्वा दैत्यो ऽपि[6] दुर्मतिः ।
जले त्ववध्यमात्मानं विदित्वा न विनिर्गतः[7] ॥ १६८ ॥

168. Hearing the sound of the retinue of the gods, the evil-minded demon, knowing himself to be imperishable in the water, did not come out.

अनिर्गतं तं तु तदा विज्ञाय मधुसूदनः ।
नौबन्ध एवमुदितो विवेशाथ सुरैः सह ॥ १६९ ॥

169. Having come to know that he would not come out, the pleased Madhusūdana entered Naubandhana, in the company of the gods.

---

1. अन्तर्जग्मुः G
2. जगन्नाथान् C
3. Thus DEFH, सर्वां ed. Leiden
4. Thus DEF, हरिदिदृक्षया A, सेशान्दिदृक्षया C
5. देवानुयात्रानिनदं C
6. सु-C
7. बहिर्ययौ C

नौबन्धशिखरे[1] रुद्रो दक्षिणे शिखरे हरिः ।
उत्तरे शिखरे ब्रह्मा तेषांमन्वसुराः सुराः[2] ॥ १७० ॥

170. Rudra (took stand) on Naubandhana peak, Hari on the Southern peak, Brahmā on the Northern peak and the gods and the Asuras followed them.

एवं ते विविशुः[3] शैले[4] ततो देवो जनार्दनः ।
अनन्तमाह धर्मात्मा वधार्थं[5] दानवस्य तु[6] ॥ १७१ ॥

171. Thus, they entered the mountain. Then the pious-minded god Janārdana, with a view to kill the demon, said to Ananta :

कुरुष्व लाङ्गलेन त्वं विदार्याद्य हिमालयम् ।
इदं[7] सरोवरं दिव्यं निस्तोयं शीघ्रमेव तु ॥ १७२ ॥

172. "Breaking forth Himālaya today with the plough, make soon this lake devoid of water."

बृहदश्वः[8]

ततस्त्वनन्तो गिरिसन्निकाशः
समग्रचन्द्रस्य समानकान्तिः ।

---

1. तन्मध्याशिखरे C
2. Thus A. सुरासुरा : other Mss.
3. तेषुनिविष्टेषु C
4. सर्वे DFH
5. वदार्थं D
6. Thus other Mss, च A
7. इत्थं corrected into इदं H
8. उवाच add CD. इति श्री नीलमतपुराणेऽनन्तानुशासनं नाम चतुर्दशोऽध्यायः Contents add C, नीलमत बृहदश्वः A, इति श्री नीलमते । बृहदश्वः I H.

व्यवर्धतावृत्य दिवं महीं च[1]
सन्त्रासयन् दैत्यगणान् समन्तात्[2] ॥ १७३ ॥

173. Bṛhadaśva (sadi) : Then Ananta, resembling a mountain and possessed of lustre equal to that of the full moon, expanded himself, covering the earth and the heaven and terrifying the hosts of demons all around.

नीलाम्बरः काञ्चनबद्धमौलिः
सम्पूज्यमानस्त्रिदशैः समस्तैः[3] ।
विदारयामास स लाङ्गलेन
हिमाचलं शैलवरं पृथिव्याम् ॥ १७४ ॥

174. Dressed in blue, wearing diadem fastened with gold, worshipped by all the gods, he, broke forth Himālaya, the best of the mountains on earth, with plough.

विदारिते पर्वतराजराजे
विनिर्ययौ तज्जलमाशु वेगात् ।
वेगेन शब्देन च[4] सर्वभूतान्
सन्त्रासयानं[5] कुटिलैस्तरङ्गैः ॥ १७५ ॥

हिमाचलाभै[6]र्गगनं स्पृशद्भिः
संप्लावयानं[7] गिरिमस्तकानि ।

---

1. Thus A, महीं दिवं च other MSS.
2. समस्तान् DEF
3. समग्रैः DEH समन्तात् A
4. स G
5. Thus ACH सन्त्रासमानं other MSS.
6. हिमाचलाभं DF
7. सपावयानं D संप्लावमानं H

संक्षीयमाणे सरसस्तु तोये
चकार मायां स जलोद्भवाख्यः ॥ १७६ ॥

अथान्धकारं ससृजे समन्ता[1]
ददृश्यमासीद् भवनं[2] नृवीर[3]
शम्भुस्तदा[4] चन्द्रदिवाकरौ द्वौ,
जग्राह देवोऽथ, करद्वयेन ॥ १७७ ॥

प्रकाशमासीज्जगति[5] निमेषा
द्ध्वस्तं तथा सर्वमथान्धकारम् ।
ध्वस्ते[6]ऽन्धकारे हरिरप्रमेयो
योगेन गत्वा[7] ह्य[8]परं शरीरम् ॥ १७८ ॥

दैत्येन युद्धं स चकार सार्धं
देहेन चान्येन च[9] युद्धमैक्षत् ।
विष्णोश्च दैत्येन बभूव युद्धं
घोरं द्रुमैः पर्वतमस्तकैश्च ॥ १७९ ॥

युद्धं च ते देवगणाः[10] समस्ता[11]
[12]...... चक्रेण देवप्रवरः समान्ते ।

---

1. समग्रम् DEFH
2. भुवनं CDEF
3. सुवीर DEF
4. Thus other MSS, तथा AH
5. जगति DF
6. Thus DE, मुक्ते AF स्तब्धे C
7. कृत्वा C
8. Thus A तु other MSS.
9. स C
10. देवेन्द्रगणाः A, देवगणाः other MSS.
11. Thus other MSS, समान्ताः A समग्राः H
12. Some pādas seem to be lost here.

चिच्छेद दैत्यस्य शिरः प्रसह्य,
ब्रह्मा ततस्तोषमुपाजगाम[1] ॥ १८० ॥

175-180. When the king of the best mountains had been broken, the water flowed forth hurriedly with force, terrifying all the beings with its violent rush and sound and overflowing the tops of the mountains with curved waves like Himālaya touching the sky. When the water of the lake was disappearing, Water-born practised magic. He created darkness all around. O hero among men, the world became quite invisible.

Then the god Śiva held the sun and the moon in his two hands. In a twinkling of the eye, the world was brought to light and all the darkness was destroyed.

When the darkness had vanished, unfathomable Hari, assuming another body with the power of Yoga, fought with the demon and witnessed that fight through a different body.

There was a terrible fight between Viṣṇu and the demon, with trees and peaks of mountains. All those hosts of gods..............

(Hari) cut off, forcibly, the head of the demon and then Brahmā obtained gratification.

ब्रह्मा विष्णुश्च रुद्रश्च[2] येषु शिखरेष्वव[3]स्थिताः।
तेषां च नामधेयानि ददुः[4] स्वानि महीतले ॥ १८१ ॥

181. Brahmā, Viṣṇu and Śambhu gave their own names to the peaks on which they had taken their stand, on the earth.

---

1. Thus other Mss, सुखमुजगाम A
2. Thus A, शम्भुः other Mss.
3. शृङ्गेषु H
4. Thus C, दधुः other Mss.

Ed. Leiden v.v. 174-175

ऊचूश्च शृङ्गप्रवरान्[1] शैलेन्द्रस्य महात्मनः।
स्नात्वैव क्रमसाराख्ये सरस्यस्मिन् नरोत्तम[2] ॥ १८२ ॥

द्रष्टा यः खलु युष्माकं[3] दृष्टास्तेन वयं त्रयः
भविष्यामो ध्रुवं शैले त्रिदिवं च प्रयास्यति[4] ॥ १८३ ॥

182-183. O best among men, they said to the high peaks of the high-souled king of the mountains : "Whoever shall see you after taking bath in this lake called Kramasāra, shall see three of us on the mountain and will go to heaven."

बृहदश्वः
तानेता[5][6]न्शिखरान् पश्य ब्रह्मा-विष्णु-महेश्वरान् ।
नौबन्धशिखरो[7] यस्तु[8] स एव नृप शंकरः ॥ १८४ ॥

184. Bṛhadaśva (said) : See, O king, these are those peaks—Brahmā, Viṣṇu and Maheśvara. That which is Naubandhana peak is Śaṅkara.

दक्षिणे[9]ऽस्य हरिः पार्श्वे वामे[10] ब्रह्मा प्रकीर्तितः ।
एतान् हि दृष्ट्वा मुच्यन्ते येऽपि दुष्कृतिनो जनाः[11] ॥ १८५ ॥

---

1. श्रृङ्गप्रवरा FH
2. नरोत्तमः AH
3. युष्मांश्च C
4. Thus other MSS, प्रदास्यति A
5. तेन F
6. तान् F
7. शिखरे G, शिखरं C
8. यत् C
9. Thus ACFG, दक्षिणो DE
10. Thus ACG, पार्श्वोवामो DE
11. Thus A जनाः other MSS

185. The one on its right side is celebrated as Hari and the left one as Brahmā. Even the evil-doers are freed by seeing these (peaks)

योऽसौ विष्णुपदो नाम क्रमसारे प्रकीर्तितः[1] :
तस्योदगाश्रमं चक्रे ब्रह्मा देववरः[2] स्वयम्[3] ॥ १८६ ॥

पश्चार्धे चाश्रमं चक्रे[4] कश्यपो भगवानृषिः ॥ १८७ ॥

186-187. To the north of that which is proclaimed as Viṣṇupada in Kramasāra, Brahmā—the best of the gods—himself erected a hermitage. The venerable sage Kaśyapa constructed a hermitage in the western half.

यस्मिन् देशे स्थितो विष्णुर्विजयं प्राप्तवांस्तदा ।
तत्राश्रमपदं चक्रे महादेवः स्वयं प्रभुः ॥ १८८ ॥

188. Mighty Mahādeva himself erected a hermitage at the spot where Viṣṇu stood and obtained victory at that time.

तस्यैव चापरे[5] भागे ह्यनन्तस्त्वाश्रमं[6] महत् ।
चकार हलभृच्छ्रीमान् वासुदेवमते स्थितः ॥ १८९ ॥

189. In the other part of that place, the honourable plough-holder Ananta, abiding by the instructions of Vāsudeva, constructed a great hermitage.

---

1. अतिकीर्तितः C
2. देवसरः DEFGH
3. Before 186 b is repeated 185 b in H
4. Om. F
5. तस्यदेवापरे (due to confusion with च C
6. स्वाश्रमं C

महादेवाश्रमाद् भागे पश्चिमेऽर्कनिशाकरौ ।
चक्रतुस्त्वाश्रमौ[1] पुण्यौ सुरम्यौ देवपूजितौ ॥ १९० ॥

190. On the western side of Mahādeva's hermitage, the sun and the moon, honoured by the gods, constructed their beautiful and holy hermitages.

पादोनयोजनं[2] गत्वा महादेवाश्रमाद्धरिः ।
आत्मनस्त्वाश्रमं[3] चक्रे नरसिंहेति विश्रुतम् ॥ १९१ ॥

191. At a distance of one Yojana lessened by one-fourth of a Yojana from Mahādeva's hermitage, Hari erected his hermitage celebrated as Narasiṃha.

अन्ये तु देवाः सरसि वितोयेऽस्य पृथक् पृथक् ।
ते चक्रुराश्रमां[4]स्तत्र[5] ऋषयश्च[6] तपोधनाः ॥ १९२ ॥

आश्रमाणि तथा नद्यश्चक्रुस्तीर्थान्यनेकशः[7] ।
गन्धर्वाप्सरसो यक्षाः शैलेन्द्राश्च सगुह्यकाः ।१९३।

192-193. Afterwards, other gods erected their hermitages, each one separately, in the lake or on the waterless place. The sages whose wealth is penance erected hermitages, and the rivers created several places of pilgrimage. So did the Gandharvas, the Apasarās, the Yakṣas and the mountain-kings along with the Guhyakas.

---

1. स्वाश्रमौ C
2. पादोने योजने DEF
3. चाश्रमं C
4. Thus AF, चक्रुराश्रमं DEG चक्रुस्वस्वाश्रमां C
5. Om. AF, तं G
6. मुनयः C
7. तीर्थाण्यनेकशः H

कृतालयौ[1] तत्र जगत्प्रधाना[2]
वुपेन्द्ररुद्रौ[3] सह पद्‌मजेन ।
कृतालयं तत्र जगत्समग्रं[4]
देशं सपुण्यं[4] परमं पवित्रम्[5] ॥ १९४ ॥

194. Viṣṇu and Rudra—the prominent ones in the world—made their abodes there along with the lotus-born (Brahmā). The whole world has made its abode there. The country is meritorious and the holiest.

जलोद्‌भवासृजा मत्त[6]स्तदा चक्रः[7] सुदर्शनः[8] ।
बभ्राम देशं शून्यं तं[9] तं च, जग्राह शंङ्करः ॥ १९५ ॥

195. Then, the Sudarśana wheel—intoxicated with the blood of Jalodbhava—wandered in that deserted land and was caught by Śaṅkara.

चक्रहस्तो जगामाथ यत्र देवो जनार्दनः ।
तमुवाच हरिर्देवं[10] प्रहसञ्शंकरं तदा[11] ॥ १९६ ॥

196. With discus in his hand, he went where (stood) the god Janārdana. Then laughing heartily, Hari said to that god Śaṅkara.

---

1. कृतालया A
2. जगत्प्रधाना A
3. Third pāda of this verse om. D
4. देशोऽयमास्ते C
5. बृहदश्व : add AEF, इति श्री नीलमतपुराणे नौबन्धनदेवायतनवर्णनं नाम सप्तदशोऽध्यायः बृहदश्व उवाच C, इति श्री नीलमते । बृहदश्वः H
6. मत्तं C
7. चक्रं C
8. सुदर्शनम् C
9. देशं तं शून्यं E शून्यं तं देशं C
10. Slightly damaged A
11. सदा G

Ed. Leiden v.v. 187-189

चक्रं मे दीयतां[1] देव[2] दैत्यसङ्घविनाशनम् ।
प्रहसन्तमुवाचाथ हरिं हासेन[3] शङ्करः ॥ १९७ ॥

197. "O divine one, hand over the discus—destroyer of the hosts of the Daityas to me." Śaṅkara (too) said in a joke to Hari who was laughing.

स्वच्छन्दोऽयं मया प्राप्तो भ्रममाणो[4] यदृच्छया ।
प्रतिग्रहेण दास्यामि तव चक्रं जनार्दन ॥ १९८ ॥

198. "Wandering at its will it has been found by me by chance. O Janārdana, I shall return your discus on the receipt of a gift."

एवमस्त्विति जग्राह तं[5] चक्रं मधुसूदनः[6] ।
अस्मिन्[7] प्रदेशे राजेन्द्र[8] यत्र वर्तसि साम्प्रतम् ॥ १९९ ॥

तादृशं परिहासं तु कृत्वा देववरो हरिः ।
तादृशीं कारयामास प्रतिमामात्मनस्तथा ॥ २०० ॥

199-200. "Be it so", said the destroyer of Mahdu and received the discus. O king, this is the place you stand on now, where Hari—the best of the gods—made a joke and got erected his own statue in that pose.

शम्भोर्देव्याश्च राजेन्द्र यथावृत्तमरिन्दम ।
तादृशं स विधानं[9] तु कारयित्वा[10] जनार्दनः ॥ २०१ ॥

---

1. Thus A, मदीयं मे देहि H, अर्पय मे other MSS.
2. Om. H
3. हास्येन AH
4. भ्रममानो H
5. तत् C
6. देवदेवो जनार्दनः add C
7. यस्मिन् C
8. eaten by moth A
9. संविधानं FH
10. कथयित्वा H

जलोद्भवशिरस्यस्मिस्कृतवांनास्पदं[1] हरिः ।
इमां मनुजशार्दूल यस्यां संनिहितावुभौ ॥ २०२ ॥

केशवश्च शिवश्चैव सर्वकल्मषनाशनौ ।
कृतदेवप्रतिष्ठानं देवदेवं जनार्दनम्[2] ॥ २०३ ॥

ऋषयो देवता नागा गन्धर्वाप्सरसां गणाः ।
द्रष्टुं सर्वे समाजग्मुर्जलोद्भवशिरस्यथ[3] ॥ २०४ ॥

201-204 O lord of kings and controller of enemies, Janārdana Hari, having got erected such establishment of Śambhu and the goddess (Pārvatī) in that pose, made his abode on the head of Jalodbhava. O lion among men, the sages, the gods, the Nāgas, the Gandharvas, the hosts of the heavenly maidens, all came there at the head of Jalodbhava to see this (statue) in which both Keśava and Śiva—the destroyers of all sins—are represented and to see Janārdana, the god of gods who erected the divine image.

देवर्षिनागमुख्येष्वधिष्ठितेष्वथ कश्यपः ।
उवाच वरवं विष्णुं[4] देशोऽयं देव मानुषैः ॥ २०५ ॥

---

1. 202-203. om. FG but added on the top margin by another hand in F

2. प्रतिष्ठां कृतवान् H

3. बृहदश्वः add H

4. After this occurs on the margin of H written by a different hand :

हस्तौ बद्ध्वा पुरःस्थितः
भगवान् भूतभव्येश शङ्खचक्रगदाधर
भवतां सत्प्रसादेन वाञ्छाम्येकं परंवरम्
भगवन्तः प्रसादेन यथाकामं जलोद्भवः
निःशेषोऽभूद् भयं सर्वं गतमेतन्निवासिनाम्
साम्प्रतं चापि भगवन्

वसतां रमणीयश्च पुण्यश्च भविता तथा ।
कश्यपे ब्रुवति त्वेवं नागा वचनमब्रुवन्[1] ॥ २०६ ॥

205-206. When the chief gods, sages and Nāgas had taken their seats, Kaśyapa, standing in front with joined hands, said to the boon-giver Viṣṇu, "O god, let this country be inhabited by human beings and be holy as well as charming." When Kaśyapa had spoken thus, the Nāgas uttered these words :

न वयं मानुषैः सार्धं वसामो मुनिपुंगव ।
तानुवाच ततः क्रुद्धः कश्यपो वै प्रजापतिः ॥ २०७ ॥

मम वाक्यमनादृत्य यस्माद् धृष्टं[2] प्रभाषथ ।
तस्मात् पिशाचैः सहिता वसध्वं[3] नात्र संशयः ॥ २०८ ॥

207-208. "O best among the sages, we would not live in the company of men." Then Prajāpati Kaśyapa certainly became angry and said to them, "As you speak audaciously, without paying regard to my words, so you shall have to dwell in the company of the Piśācas. There is no doubt here.

एवमुक्ते[4] कश्यपेन नीलः प्राञ्जलिरब्रवीत् ।
एते क्रोधवशाद् ब्रह्मन् न विजानन्ति किंचन ॥ २०९ ॥

209. Kaśyapa having spoken thus, Nīla said with joined hands, "O Brahman, they are overpowered by anger and know nothing".

---

1. After this verse occurs on the margin of H written by a different hand.

अहो धिक् किमिदं तात वाञ्छस्यस्मदनर्थदम्
क्व नागवसतिः कुत्र वासश्चापि नृणां खलु ॥
अल्पायुषां सदुःखानां तथा स्वल्पदृशामपि ।
कथमेषा मतिर्जाता तवास्मान् प्रति मानद ॥

2. दुष्टं CDEFH
3. वस्त्यध्वम् CDEFGH
4. Thus DEFGH, शप्ते C, उक्तः A

कश्यपस्तमुवाचाथ ऋषिः परमधार्मिकः ।
वालुकार्णवमध्ये तु द्वीपः षड्योजनायतः ॥ २१० ॥

तत्र सन्ति पिशाचा ये दैत्यपक्षाः सुदारुणाः ।
तेषां तु निग्रहार्थाय पिशाचाधिपतिर्बली ॥ २११ ॥

निकुम्भो[1] नाम धर्मात्मा कुबेरेण तु योजितः ।
चैत्र्यां याति सदा योद्धुं पिशाचैर्बहुभिः सह ॥ २१२ ॥

210-212. Then Kaśyapa, the most pious sage, spoke to him, "In the centre of the Sea of Sand, there is an oasis six yojanas long. There dwell highly terrible Piṣācas belonging to the side of the Daityas. Nikumbha—the noble and strong lord of the Piśācas—has been appointed by Kubera for keeping them in check. Every time in the month of Caitra, he along with many Piśācas goes to fight.

पञ्चकोट्यः पिशाचानां निकुम्भस्यानुयायिनाम् ।
गत्वा निकुम्भस्तैः सार्धं षण्मासान् युद्ध्यते सदा ॥ २१३ ॥

तत्रापि कोटयः पञ्चैव पिशाचानां दुरात्मनाम् ॥ २१४ ॥

213-214. There are five crore Piśācas who are the followers of Nikumbha. Nikumbha goes along with them and fights continuously (against the evil-minded Piśācas) for six months. Of the evil-minded Piśācas, too, there live only five crores.

ये ऽधिकाः कोटिदशकान्[2] नाशमायान्ति ते सदा ।
पक्षयोरुभयोर्नील षड्भिर्मासैः सदैव तु ॥ २१५ ॥

215. O Nila, those who exceed ten crores on both the sides are destroyed every time, in the period of six months.

1. निकुम्भ C

2. Thus AC कोटिदशका other MSS.

निकुम्भः पुनरायाति पञ्चकोटिसमो[1] बली[2] ।
शुक्लाश्वयुक्पञ्चदश्यां नित्यं देवप्रसादतः ॥ २१६ ॥

216. Due to the favour of the god (Kubera), the mighty Nikumbha, along with his five crore (followers), comes again everytime on the bright fifteenth of Āśvayuj.

हिमाचले तु षण्मासान् स सदा वसते[3] सुखी ।
अद्य प्रभृति षण्मासांस्तस्येह वसतिर्मया ॥ २१७ ॥

दत्ता तु सहितास्तेन ससैन्येनेह वत्स्यथ ।
षण्मासान् मानवैः[4] सार्धं निकुम्भे निर्गते सदा ॥ २१८ ॥

217-218. For six months he lives happily on the Himācala. From today I have allotted to him a dwelling-place here for six months (of each year). You shall have to live here for six months with him along with his armies and for six months, after his departure, in the company of men."

एवमुक्तस्तदानीलः पितरं प्राह[5] धार्मिकः ।
नित्यमेव हि वत्स्यामो मानुषैः सहिता वयम्[6] ॥ २१९ ॥

न पिशाचैश्च[7] वत्स्यामो दारुणैर्दारुणप्रियैः ।
एवं ब्रुवति नागेन्द्रे नीले[8] विष्णुरभाषत ॥ २२० ॥

219-220. Addressed thus, the pious Nīla said to his father,

---

1. पञ्चकोटिवृतो C
2. वले DEF
3. वसति G
4. दानवैः DF
5. चाह G
6. Fourth pāda of this verse and first pāda of next verse om. D
7. Thus A, तु other MSS.
8. नीलं C

"We are ready to live always in the company of men. We would not live with the Piśācas who are cruel and who like cruelty." When Nīla the Nāga-chief spoke thus, Viṣṇu said :

मुनिवाक्यं तु भविता नील एकं चतुर्युगम् ।
ततः परं तु सहिता[1] मनुष्यैरेव[2] वत्स्यथ ॥ २२१ ॥

221. "O Nīla, the words of the sage will be effective for one Caturyuga (i.e. four aeons). After that you will live in the company of men only.

अल्पवीर्याः पिशाचाश्च भविष्यन्तीह सर्वदा ।
वीर्योपेता गमिष्यन्ति[3] षण्मासान् वालुकार्णवम् ॥ २२२ ॥

222. Here the Piśācas will always become weak. Endowed with strength, they will go, to the Sea of Sand for six months.

नागस्य यस्य ये स्थाने निवसिष्यन्ति मानवाः ।
ते तं[4] संपूजयिष्यन्ति पुष्पधूपानुलेपनैः ॥ २२३ ॥

नैवेद्यैर्विविधै र्धूपैः[5] प्रेक्षादानैः सुशोभनैः[6] ॥ २२४ ॥

223-224. The men will worship the Nāga in whose territory they shall dwell, with flowers, incense, ointments, eatable offerings, incenses of various types and excellent gifts of dramatic performances.

---

1. सुखिनो C
2. Thus FH, एव G, सह other MSS.
3. Thus other MSS., भविष्यति A
4. Thus other MSS., नामं A
5. Thus A, –धूपैः DEFG –गन्धैः C
6. च शोभनैः C

त्वयोक्तं च सदाचारं पालयिष्यन्ति ये नराः[1]।
तेऽस्मिन्[2] देशे भविष्यन्ति[3] पशुधान्यसमन्विताः[4] ॥ २२५ ॥

225. Those men in this country, who will follow the good customs laid down by you, will be endowed with animals and grains.

कः प्रजापतिरुद्दिष्टः कश्यपश्च प्रजापतिः।
तेनेदं[5] निर्मितं[6] देशं[7] कश्मीराख्यं[8] भविष्यति ॥ २२६ ॥

226. Prajāpati is called Ka, and Kaśyapa is also Prajāpati. Built by him this country will be called Kaśmīra.

कं वारि हलिना[9] यस्माद्देशादस्मादपाकृतम्।
कश्मीराख्यं ततोऽप्यस्य[10] लोके नाम भविष्यति ॥ २२७ ॥

227. Because water called Ka was taken out by Balarāma (the plough-wielder) from this country, so this will be called Kaśmīra in this world.

यैवोमा सैव कश्मीरा यस्मात्तस्माद् भुजंगम ॥ २२८ ॥

विशोकेत्यभिविख्याता बृंहिता च तथा मया।
स्त्रीरूपधारिणी भूत्वा वृद्धतीर्थे निवत्स्यति ॥ २२९ ॥

---

1. Thus A, जना other MSS
2. Thus BDEFG, तस्मिन् AH, तेऽत्र C
3. निवत्स्यन्ति EF, पशूंश्चैव H
4. पशुधान्यै र्धनैर्युताः E, पशुधान्यधनैर्युता F, धान्यपुत्रपशुपात्रसमन्विताः C, धनधान्यसमन्विताः H
5. तेनासौ C
6. निर्मितो C
7. देशो C
8. कश्मीराख्यो C
9. Thus ADF, हलिना Corrected into हरिना by H, हरिणा other MSS.
10. Thus C तथा प्यस्य, BDEFH तथा यस्य A

228-229. O Nāga, because Kaśmīrā is the same as Umā so She—nourished by me, celebrated as Viśokā and assuming the form of a woman shall dwell at Vṛddhatīrtha.

वासुकेर्नागराजस्य तस्मिंस्तीर्थवरे सदा ।
वसतिर्भविता नाग[1] तत्रस्थं तं च पूजय ॥ २३० ॥

230. O Nāga, at that sacred place there shall always be the dwelling-place of Vāsuki, the king of the Nāgas. Worship him who lives there.

ममांशः स तु नागेन्द्र नागानामीश्वरेश्वरः ।
तस्याज्ञां विफलां कुर्वन् मम हस्ताद् विनश्यति ॥ २३१ ॥

231. O chief of the Nāgas, that lord of the kings of the Nāgas is a part of my ownself. He who disobeys his order meets destruction at my hand.

नागानामालयं नाग नाम्ना भोगवती पुरी[2] ।
योगी भूत्वा स नागेन्द्रस्तत्रेहापि कृतालयः ॥ २३२ ॥

प्रधानेन शरीरेण भोगवत्यां तु वासुकिः ।
पालयन् वत्स्यते[3] नागां[4]स्त्वं वसेह सदानघ ॥ २३३ ॥

232-233. O Nāga, the dwelling of the Nāgas is the city named Bhogavatī. Having become a Yogī that Nāga-chief (Vāsuki) dwells there as well as here. But with his primary body, Vāsuki, protecting the Nāgas, shall live in Bhogavatī. O sinless one, you (also) dwell here constantly."

एवमुक्त्वा[5] तदा विष्णुः प्रययावीप्सितां गतिम् ।
देवर्षिनागगन्धर्वाः प्रययुस्ते यथागताः[6] ॥ २३४ ॥

234. Having said so, Viṣṇu then went on his desired

---

1. तत्र E
2. भोगवतीं पुरीम्
3. तस्य तान् H
4. नाग C
5. उक्ता D
6. Thus A, यथागतम् other MSS.

course. The gods, the sages, the Nāgas, and the Gandharvas went away as they had come.

नानादेशसमुत्थैस्तु ततः प्रभृति मानवैः[1] ।
षण्मासान् वसते देशः[2] षण्मासान् पिशिताशनैः ॥ २३५ ॥ उष्यते

235. Since then, the country is inhabited for six months (of the year), by human beings belonging to various countries, and for six months by the eaters of raw flesh.

कृत्वा मनुष्या राजेन्द्र धान्यसस्यादि[3]सङ्ग्रहम् ।
आदायाज्ञां विनिर्यान्ति चैत्र्यामायान्ति सर्वदा ॥ २३६ ॥

236. O chief of the kings, having collected rice, grains etc. the human beings go away after taking permission and come back always on (the full-moon day of) Caitra.

एवं निविष्टां[4] कश्मीरां[5] दृष्ट्वा हृष्टस्तु[6] कश्यपः ।
आराध्य शङ्करं देवमुमादेवी[7] मचोदयत् ॥ २३७ ॥

देशस्य पावनायास्य तोयदानेन पार्थिव ।
सा वितस्तेति विख्याता नदी पापप्रणाशिनी ॥ २३८ ॥

237-238. O king, pleased to see Kaśmīrā thus populated, Kaśyapa worshipped the god Śaṅkara and induced the goddess Umā to purify this country by the gift of water. She—the sin destroying one—is renowned as the river Vitastā.

---

1. After मानवैः is added on the margin by F चतुर्वर्णान्वितैः शूरवीरविद्वत्समागतैः ।
2. देशोवसति षण्मासान् CF
3. Thus corrected from सस्यावि by F, former reading other MSS.
4. निविष्टान् C
5. काश्मीरान् C
6. प्रीतस्तु F
7. उमां देवीम् C

आराध्य केशवं देवं[1] तथा लक्ष्मीमचोदयत्[2] ।
देशस्य पावनायास्य सा विशोकेति कीर्तिता[3] ॥ २३९ ॥

239. Having worshipped the god Keśava, he induced Lakṣmī to purify this country. She is glorified as Viśokā.

अदितिर्देवमाता च कश्यपेन प्रचोदिता ।
त्रिकोटिर्नामितो भूत्वा नदी देशे[4] प्रसर्पति ॥ २४० ॥

240. Induced by Kaśyapa, Aditi, the mother of the gods also, having become the river named Trikoṭi, flows in this country.

शक्रपत्नी शची या च सापि[5] कश्यपचोदिता ।
नाम्ना[6] हर्षपथा जाता देशेऽस्मिन् पापसूदनी[7] ॥ २४१ ॥

241. Induced by Kaśyapa, Śacī also, who is the wife of Indra, became in this country, Harṣapathā, by name the destroyer of sins.

दितिश्चन्द्रवती जाता ऋषेर्वचनकारिणी[8] ।
स्वमंशं यमुनादेवी वितस्तायै समर्पयत्[9] ॥ २४२ ॥

242. Diti, following the advice of the sage, became (the

---

1. देश G, चापि C
2. अवोचयत् E
3. कथ्यते F
4. देशं D
5 सा च DEFGH
6. Thus corrected by A from नाम
7. पापसूदिनी C
8. Thus DEFH, देशेस्मिन् पापनाशिनी other MSS.
9. समर्पति H

river) Candravatī. The goddess Yamunā gave her own portion to the Vitastā.

एवं कश्यपवाक्येन देवदानवमातरः[1] ।
देवपत्न्यस्तथा पुण्याः सरिद्रूपत्वमागताः ॥ २४३ ॥

243. Thus, by the order of Kaśyapa, the mothers of the gods and the demons and the holy wives of the gods assumed the forms of rivers.

तथा[2] कश्यपवाक्येन तीर्थसागरनिम्नगाः ।
कश्मीरायां[3] तदा[4] जग्मुः सांनिध्यं च महीपते[5] ॥ २४४ ॥

244. O lord of the earth, then, due to the advice of Kaśyapa, the sacred waters, the oceans and the rivers went to Kaśmīrā and her vicinity.

एवं नरेन्द्र कश्मीरा[6] प्राप्ते[7] वैवस्वतान्तरे[8] ।
समुत्पन्ना महापुण्या हरभार्या सती शुभा ॥ २४५ ॥

245. O lord of the kings, thus, on the arrival of Vaivasvata Antara, the highly meritorious and beautiful wife of Hara was born as Kaśmīrā.

कश्मीरायां[9] तथा राजा त्वया ज्ञेयो हरांशजः ।
तस्यावज्ञा न कर्तव्या सततं भूतिमिच्छता[10] ॥ २४६ ॥

246. Desiring continuous welfare, you should regard the king Kaśmīrā as born of a portion of Hara and never disobey him.

---

1. देवमानवमातरः G, देवता नत्रमातरः H
2. Thus FE, तव्यां (तस्यां?) A, तत्र C
3. काश्मीरेषु C
4. Thus BCE, सदा ADFGH
5. पुण्यवृद्धये C
6. कश्मीराः CH
7. प्राप्ता H
8. Thus A वैवस्वतेऽन्तरे other MSS
9. कश्मीरेषु C
10. नीलमते देशनिवेशो नाम add ADEFG, इति श्री—H, इति श्रीनीलमतपुराणे कश्मीरदेवी नदीत्ववर्णनं नाम अष्टाविंशोऽध्यायः C

Ed. Lieden v.v. 234-237

गोनन्दः[1]

कथं सती[2] शची गङ्गा अदितिर्यमुना दितिः ।
सरित्वमिह संप्राप्ता या च देवी करीषिणी ॥ २४७ ॥

247. Gonanda (spoke): "How did Satī, Śacī, Gaṅgā, Aditi, Yamunā, Diti and the goddess Karīṣinī obtain the forms of rivers here?"

बृहदश्वः[3]
कदाचित् कश्यपं द्रष्टुं ययुर्देव्यः प्रकीर्तिताः ।
तास्तत्र चोदयामास कश्यपो भगवानृषिः ॥ २४८ ॥

248. Bṛhadaśva (said): "Once the glorified goddesses went to see Kaśyapa. The venerable sage Kaśyapa induced them there (thus).

कश्मीरा[4] नाम सुभगो देशो वै निर्मितो मया ।
तं देशमम्बुदानेन भावयध्वं शुचिस्मिता[5]: ॥ २४९ ॥

249. The beautiful country named Kaśmīrā has been created by me. O possessed of pure smiles, cherish that (country) by gift of water.

अदितिश्च दितिश्चैव शची गङ्गा च निम्नगाः ।
एवमस्त्वित्यभाषन्त[6] नोमा न च करीषिणी ॥ २५० ॥

250. Aditi, Diti, Śacī and the river Gaṅgā said, "Let it be so" but neither Umā nor Karīṣinī (spoke).

---

1. आह add DEFG, उवाच C
2. सीता G
3. उवाच add CDE
4. कश्मीरो G
5. शुचिः मिताः D
6. भाषन्त F

आराधयामास तदा सत्यर्थेन[1] तु[2] शङ्करम्[3] ।
अथोवाच[4] हरो भार्यां कुरु कश्यपभाषितम् ॥ २५१ ॥

251. Then he worshipped Śaṅkara for (inducing) Satī. Hara there after said to his wife : "Do as has been said by Kaśyapa."

ततोऽवोच[5]दृषिं देवी स च देशस्तनुर्मम ।
यदा तदा पूत[6] एव किं मया तत्र कारणम् ॥ २५२ ॥

252. The goddess then spoke to the sage. "That country being my own body is already purified. What is to be done by me there?"

कश्यपः[7]
पिशाचैः सह सम्पर्कस्तत्र नित्यं यदा नृणाम् ।
तदा तेषां मतिः पापात् सततं नापसर्पति ॥ २५३ ॥

253. Kaśyapa (said) : "As the human beings are always associated with Piśācas there, so their intellect does not always diverge from sin.

अपूज्याः सर्वदेशेषु दुराचारा मलैर्वृताः[8] ॥ २५४ ॥

254. Dishonoured in all countries, possessed of evil practices and covered with impurities....[9]

---

1. सत्यत्वेन E, सत्यर्थं C
2. Thus D, च EH, व A, om. C
3. शंकरं विभुम् C
4. Thus DEF, तदोवाच AH
5. Space for one letter left between ततो and वद् by A, अवोचत्तं C
6. Thus other MSS., पूर्वं A
7. उवाच add CDE
8. मलावृताः C
9. One hemistich is lost.

पापं कृतं च यत् क्षेत्रे तन् मे गुरुतरं मतम् ।
त्वयैव पापं यत्[1] तेषां शमनीयं वरानने[2] ॥ २५५ ॥

255. O beautiful faced, their sin can be allayed by you alone, as the sin committed in this land is regarded to be very weighty by me.

बृहदश्वः[3]
इति तथ्यं[4] विदित्वा सा कृपया[5] परया युता ।
उवाच देवी भर्तारं[6] चारुचन्द्रनिभानना ॥ २५६ ॥

256. Bṛhadaśva (said): After knowing this fact, the goddess, having a face beautiful like the moon and possessed of great compassion, said to her lord:

रसातले नदीरूपं करिष्यामि जगद्गुरो ।
कुरु[7] शूलप्रहारं त्वं नीलवेश्मसमीपतः ॥ २५७ ॥

यत्रासील्लाङ्गलमुखं प्राक् प्रभो शैलदारणे[8] ।
तेन शूलप्रहारेण निष्क्रम्याहं रसातलात् ॥ २५८ ॥

---

1. तत् F
2. नीलमते add DEFG, इति श्री—H, इति श्री नीलमतपुराणे गौरीशिवप्रसादनं नाम एकोनत्रिंशोऽध्यायः C
3. उवाच add C
4. Om. F, तथा A
5. Thus DEF, क्षमया CH
6. Letter भ om. A
7. गुरु A
8. शैलधारणे E, शीलाधारिणे F, शैलदारणं G

हलमार्गेण[1] यास्यामि यावत् सिन्धुर्महानदः[2] ।
तथा[3] चक्रे हरो देव[4]स्तथा चक्रे सती शुभा ॥ २५९ ॥

257-59. "O father of the world, I shall assume the form of a river in the Nether World. Make a stroke with your spear near the abode of Nīla, where, O lord, while breaking the mountain, was (placed) the point of the plough. By that stroke of the spear I shall come out of the Nether World and shall follow the way made with the plough up to the place where there is the great river Sindhu." The god Hara (accordingly) did this and so did the beautiful Satī.

तस्या नाम वितस्तेति कृतवान् शङ्करः स्वयम् ।
वितस्तिमात्रं गर्तं तु शूलेन कृतवान् हरः ॥ २६० ॥

रसातलगता येन निष्क्रान्ता[5] सा[6] सरिद्वरा ।
तस्माद् वितस्तेति कृतं[7] नामैतस्याः[8] स्वयंभुवा ॥ २६१ ॥

260-61. Śaṅkara himself named her as Vitastā. Because Hara had excavated with the spear a ditch measuring one Vitasti, through which the good river—gone to the Nether World—had come out, so she was given the name Vitastā by Svayambhu.

ततस्तु सर्वदेशेषु जनः शुश्राव पार्थिव ।
सती देवी नदी भूत्वा कश्मोराया[9] विनिर्गता ॥ २६२ ॥

---

1. Thus AEFH, फलमार्गेण D, शूलमार्गेण C
2. सिन्धुं महानदम् C
3. तत्र ed Leiden
4. कृते च शर्वेण C
5. विनिष्क्रान्ता H
6. Om. H
7. Thus other MSS., कृते A
8. तस्या नाम C
9. कश्मीरेभ्यो C, कश्मीरायां E

262. Then, O king, the people in all the countries heard that the goddess Satī, after assuming the form of a river, had appeared in Kaśmīrā.

महापातकसंयुक्तस्तस्यां स्नातुं तदा जनः ।
आजगाम भयात्तेषां शूलखातनियोजनात्[1] ॥ २६३ ॥

रसातलं जगामाशु पुनस्तामेव[2] कश्यपः ।
प्रसाद्योन्मज्जयामास[3] पञ्चहस्तसमीपतः ॥ २६४ ॥

263-64. Then the people, possessed of great sins, came to have bath in that (river). Being afraid of them, she went away quickly from that way excavated by means of spear to the Nether world. Propitiating her, Kaśyapa again brought her out near Pañcahasta.

पञ्चहस्तस्य नागस्य भवनात्तां विनिर्गताम् ।
गव्यूतिमात्रमायातां[4] कृतघ्नस्तां ददर्श वै[5] ॥ २६५ ॥

265. Issuing forth from the abode of the Nāga Pañcahasta, she had covered a distance of one gavyūti only when an ungrateful person, verily, saw her.

सा च दृष्टा कृतघ्नेन त्वन्तर्धानं[6] गता पुनः ।
भूयः कश्यपवाक्येन चोदिता निम्नगोत्तमा ॥ २६६ ॥

तच्चक्रात्[7] क्रोशमात्रे तु प्रददौ दर्शनं तदा ।
मित्रस्त्रीगामिना दृष्टा ततो[8]ऽदर्शनमागता ॥ २६७ ॥

1. Thus AC, शूलख्यातनियोजनात् DE
2. Thus other MSS., तामाह A
3. उन्मोचयामास C
4. Thus C, आयाता other MSS.
5. Emended from तं ददर्श वै other MSS., निददर्श ह C
6. ह्यन्तर्धानं DEH, तिरोधानं C
7. यच् —G
8. भूयो C

266-67. Seen by an ungrateful one, she again disappeared. Persuaded once more by the sayings of Kaśyapa, the best of the rivers allowed her person to be seen at a distance of a Krośa from that Cakra. Then seen by one who had illicit relation with a friend's wife, she again disappeared.

भूयः[1] कश्यपवाक्येन नरसिंहाश्रमे शुभा ।
उन्ममज्ज[2] नदी[3] विप्रैः स्तूयमाना सहस्रशः ॥ २६८ ॥

268. By the word of Kaśyapa and praised by thousands of Brāhmaṇas, the beautiful river was brought out at the hermitage of Narasiṃha.

क्रोशमात्रे ततो दृष्टा ब्रह्मघ्नेन महानदी ।
अन्तर्धानं जगामाशु ततस्तामाह कश्यपः[4] ॥२६९ ॥

269. Again at a distance of one Krośa, the great river, seen by a Brāhmaṇa-killer, vanished at once and then Kaśyapa said to her:

नमोऽस्तु ते पर्वतराजकन्ये[5]
नमोऽस्तु तुभ्यमृषिवर्यजुष्टे ।
नमोऽस्तु तुभ्यं हरसङ्गलब्ध-
पवित्रभावे वरदे[6] वरेण्ये ॥ २७० ॥

270. "Salutation to you, O daughter of the king of mountains; salutation to you, loved by the best sages; salutation to you, the giver of boons, worthy of being solicited and possessed of sacred character by association with Hara.

---

1. ततः C
2. Thus G, उन्मज्जत AH, उन्ममज्ज DF, उन्मग्नासौ C
3. मती C
4. कश्यपः add H
5. त om. A, पर्वतराजपुत्रि H
6. व om. A

सुपुण्यतोये[1] सुरयोषिताभि
श्चक्रीडमानाभिरुपेततीरे[2] ।
देवद्विजाद्यै[3]रुपगूह्यमाने[4]
सुशीततोये[5] विमले विशोके ॥ २७१ ॥

येषां[6] हि भीत्या[7] प्रपलायसि[8] त्वं
त्वद् दर्शनाद् देवि विमुक्तपापाः ।
वृत्ता नरास्ते गतसर्वपापाः
त्वां[9] भासयन्तः[10] प्रभया महत्या[11] ॥ २७२ ॥

271-72. O goddess—devoid of impurities and grief, having holy and cool water, with the banks approached by the frolicsome wives of the gods, embraced by the twice-born and the gods—afraid of whom you are running away, those very men—devoid of all sins and shining with great lustre—surround you.

सप्तार्चि[12]दग्धस्य यथा शुचित्वं
त्वद्दर्शनाद् देवि तथा शुचित्वम् ।
सर्वं पवित्रं भवतीह तद्वत्[13]
पापं महेशानि कुरु प्रसादम् ॥२७३ ॥

---

1. —तोयं A
2. —तीरं A
3. देवद्विजात्यै: G
4. उपगूह्यनन्ते F, उपगूहमाना G, उपगूह्यमाना A
5. सशीततोये G
6. येभ्यो C
7. Thus A, भीता other MSS.
8. प्रपलायसे C
9. द्यां A
10. भासयांत्य: G, भासयन्ते C
11. Third and fourth pādas om. H
12. कृषाणु—H
13. मात: C

273. O goddess, just as a thing burnt in the fire gets purity, so is the purity (obtained) from your sight. All sins become purified in the same way. O great goddess, be favourable !

पापानां पावनार्थाय प्रार्थितासि[1] महानदि[2]।
तस्मात् पावय पापानि मा प्रणाशं व्रजाशुगे॥ २७४ ॥

274. O great river, you have been requested for the purification of the sinners, so purify the sins. O swiftly going one, do not go out of sight."

एवं प्रसादिता भक्त्या कश्यपेन महात्मना।
उवाच कश्यपं देवी तं तथावादिनं तदा[3]॥ २७५ ॥

275. Gratified thus with devotion of the high-minded Kaśyapa, the goddess spoke to Kaśyapa who was speaking in that way.

अत्यन्तपापसंयुक्तान् नाहं पवितु[4]मुत्सहे ।
तदत्र प्रेरय विभो[5] लक्ष्मीं शाङ्गंधर[6]प्रियाम्॥ २७६ ॥

शक्ता हि पावने ब्रह्मंस्त्रैलोक्यस्यापि सा भवेत्।
अदितिश्च दितिश्चैव या च[7] गङ्गा[8] महानदी॥ २७७ ॥

अन्याश्च सर्वाः सरित[9]स्तस्याः साम्यं न बिभ्रति[10]।
केवलं प्रार्थयस्वाद्य लक्ष्मीं केशववल्लभाम्[11]॥ २७८ ॥

---

1. Thus other MSS, पार्थिवानां G, प्रार्थिता त्वं ed Leiden.
2. महापगे C
3. तथा G,देवी add H
4. पावयितुम् C
5. प्रभो DH
6. शार्ङ्गधनु–D
7. तथा C
8. गन्ध inserted between च and गङ्गा by A
9. हरितः A
10. Thus corrected from बिभ्रति न by H
11. पावनवल्लभां A

276-78. "I do not dare purify those who are associated with too much of sin. For this implore Lakṣmī, the beloved of the bowholder (i.e. Viṣṇu). She is capable of purifying even the three worlds. Aditi, Diti, the great river Gaṅgā and all other rivers do not bear any comparison to her. Request today only Lakṣmī—the beloved of Keśava."

तस्याः स[1] वचनं श्रुत्वा प्रययौ भगवान् किल ।
गोविन्दमाराधयितुं श्वेतद्वीपं विहायसा ॥ २७९ ॥

279. Hearing her words, the venerable one, verily, went by the airy way to Śvetadvīpa to adore Govinda.

गोविन्दस्त्वब्रवील्लक्ष्मीं गच्छ त्वं देवि माचिरम् ।
केशवेनैवमुक्ता तु लक्ष्मीः शोकसमन्विता ॥ २८० ॥

उवाच वाक्यं प्रथमं गता तत्र[2] सती विभो ।
पश्चान्मम गतायाः[3] सा ध्रुवं नाम हरिष्यति ॥ २८१ ॥

280-81. Govinda said to Lakṣmī. "O goddess go, do not be late." Addressed thus by Keśava, Lakṣmī—filled with grief—spoke this sentence: "O Lord, Satī has already gone there. She will, verily, take away the credit of me who shall go afterwards.

एवं सशोकां विज्ञाय कश्यपस्त्वब्रवीत् पुनः ।
त्वमेव परमा शक्ति र्बहुभिर्मूर्त्तिभिः[4] स्थिता[5] ॥ २८२ ॥

282. Knowing her full of grief, Kaśyapa spoke again. You are the supreme power appearing in various forms.

---

1. स तस्या C
2. यस्मात् H
3. आगताया H
4. मन्त्रिभिः C
5. स्तुतां C

Ed. Leiden vv. 270-273b.

क्षीरोदकन्ये विरजे पवित्रे मङ्गलास्पदे ।
त्वमेव देवि कश्मीरा त्वमेवोमा प्रकीर्त्तिता ॥ २८३ ॥

त्वमेव सर्वदेवीनां मूर्तिभिर्देवि संस्थिता ॥ २८४ ॥

283-84. O goddess, daughter of the sea, devoid of dust, holy, abode of auspiciousness, it is you who are Kaśmīrā, it is you who are glorified as Umā, it is you who, O goddess, are living in the forms of all goddesses.

वैतस्तमम्भस्तव तोयमिश्रं
मध्वमृताढ्य[1] च[2] यथा तथास्तु ।
स्नातास्त्व[3]दम्भस्यपि पापमग्नाः
सद्यो विमुक्ता विमली भवन्तु[4] ॥ २८५ ॥

285. The water of the Vitastā, mixed with your water, may be such as is the honey mixed with nectar. Bathed in your water, even the sinners become free at once and are purified."

एवं स्तुता कश्यपेन[5] विशोका समपद्यत[6] ।
चिन्तयामास च तदा[7] भर्तृवाक्यं ध्रुवं मया[8] ॥ २८६ ॥

कर्तव्यमृषि[9]वाक्यं च किं विचारेण वै मम[10] ।
नदी भूत्वा[11] जगामाशु कश्मीरा[12] वाक्यमब्रवीत् ॥ २८७ ॥

---

1. Thus all MSS., मध्वमृताद्यं ed Leiden
2. तु H
3. तद AH
4. Thus DE, भवन्ति AH
5. स्तुतासौ मुनिना C
6. Thus other MSS., समपश्यत A
7. Thus D, सर्वदा EF, वरदा H
8. Thus other MSS., तथा A
9. मुनि–C
10. हि वै मम G, मे पुनः C
11. भूता A
12. Thus DEF, कश्मीरां A, मुनिः C

286-87. Lauded by Kaśyapa, she became devoid of grief. The giver of boons, (she) thought, "I must act according to the words of my lord and of the sage. Certainly, there is no use of my thinking. Having assumed the form of a river she went quickly. Kaśmīrā spoke:

व्रज शीघ्रं यावदिह् त्वत्प्रतीक्षा सती स्थिता ।
यावत् सा प्रथमं देशं[1] न पावयति[2] सुन्दरि ॥ २८८ ॥

तावत् पावय[3] तोयेन तव नाम भविष्यति ।
तस्या[4]स्तद् वचनं श्रुत्वा विशोका समपद्यत ॥ २८९ ॥

288-89. "Go soon before Satī reaches here to wait for you. O beautiful one, purify (this) country with water before she purifies it first. You will get a good name." Having heard her words she became griefless.

तस्माद् विशोकेति नदी सततं कथ्यते जनैः ।
मनोजवापि[5] कश्मीरा[6] सत्यै देव्यै[7] न्यवेदयत् ॥ २९० ॥

290. That river, therefore is always called Viśokā (Griefless) by the people. Kaśmīrā, whose speed is like that of the mind, also told (everything) to the goddess Satī.

लक्ष्म्यां विचेष्टितं श्रुत्वा सती च श्रुतविस्तरा[8] ।
हृष्टा मार्गेण[9] चोत्तस्थौ[10] धौम्याश्रमसमीपतः ॥ २९१ ॥

1. देवि H
2. Thus C, भावयति ADEF
3. Thus C, भावय ADEFG
4. तस्य C
5. Thus DEF, मनोरमा AC
6. आगतां तां च कश्मीरान् C
7. दित्यै A
8. बहुविस्तरम् C
9. दृष्टा–A, प्रीतिमार्गेण DEF
10. च तस्या DE

291. Having listened to the activities of Lakṣmī, Satī, who had heard all the details, became pleased and stood waiting in the way near the hermitage of Dhaumya.

आखोर्बिलेन शून्यत्वाद् विशोका चाप्य[1]नन्तरम् ।
आजगाम वितस्तां च ददर्श पुरतः स्थिताम् ॥ २९२ ॥

292. Viśokā, too, afterwards, came through the hole of Ākhu as it was vacant and saw Vitastā who was standing in front.

दृष्ट्वा वितस्तां गतमत्सरा[2] सा
जगाम योगं[3] च[4] तया[5] विशोका ।
पूर्वागता तत्र तदा[6] वितस्ता
जग्राह नाम क्षितिपप्रधान[7] ॥ २९३ ॥

293. O chief of the kings, Viśkoā—freed of all jealousy on seeing Vitastā—joined her. Then Vitastā, who had reached there first, appropriated her name.

कश्मीरां[8] तु तदा[9] क्रुद्धा विशोका त्वशपत्[10] प्रभो ॥ २९४ ॥

उपक्षीर्णा[11]नृतेनाद्य त्वया यस्मादहं खले[12] ।
सती च श्राविता यस्मात्त्वया मम विचेष्टितम् ॥ २९५ ॥

---

1. वाथ A
2. गतमत्सरां F
3. तोयं A
4. स G
5. तथा EDFH
6. तया A
7. स्वमतः क्षितीश C
8. कश्यपं C
9. ततः A
10. Thus DEF, अपश्यत् AGH
11. Thus emend. from उपशीर्णा DGH, उपशीर्णम् A, उपचीर्णा ed Leiden
12. खले G, खलु A

Ed. Leiden v.v. 282-284

तस्मात्ते प्रायशो भावी जनः खल्वनृते रतः ।
अपूजनीयो लोकेषु मलवान् कर्मकृत् तथा ॥ २९६ ॥

294-96. O lord, then angry Viśokā cursed Kaśmīrā, "O wicked one, as I have been absorbed by you today by means of falsehood and you have informed Satī about my activities, so your people will be mostly liars, possessed of impurities, hired servants and dishonoured in the worlds.

यन्मे मानं[1] हृतं सत्या न मे व्रीडात्र[2] जायते ।
यैवाहं सैव कश्मीरे[3] सती देवी न संशयः ॥ २९७ ॥

297. As regards taking away of my prestige by Satī, there is no humiliation to me as the goddess Satī, O Kaśmīrā, undoubtedly is the same as I.

सती लक्ष्मीसमेता तु पावयन्ती ततो जनम् ।
जगाम हलमार्गेण मन्दंमन्दं[4] सरिद्वरा ॥ २९८ ॥

298. Then the best among the rivers, namely Satī accompanied by Lakṣmī, went slowly through the way made with the plough, purifying the people.

अदितिर्देवमाता तु[5] त्रिकोटीत्यभिविश्रुता[6] ।
संयोगं सहिता[7] देव्या ततः[8] प्राप्ता[9] वितस्तया ॥ २९९ ॥

---

1. Thus ADEFH, नाम C
2. च H
3. कश्मीरा C
4. Thus A, मन्द-मन्दं other MSS.
5. Thus DE, C
6. अपिविश्रुता F
7. Thus C, सहिते G, सहितो ADEF
8. तया C
9. प्राप्तो AG

299. Aditi, the mother of the gods celebrated as Trikoṭī, joined the goddess Vitastā.

ततः शची शक्रपत्नी नाम्ना शक्रपथा नदी ।
ततश्चन्द्रवती नाम दितिर्दैत्यारणिर्नृप[1] ॥ ३०० ॥

300. O king, then (joined) Śacī, the wife of Indra, named as river Harṣapathā, and Diti, the mother of Daityas, Chandravatī by name.

एवं क्रमेण या देवी गृह्णन्त्य[2]थ सरिद्वराः ।
जगाम गङ्गया सार्धं संयोगं[3] सिन्धुना सह ॥ ३०१ ॥

301. Receiving good rivers in this way, the goddess became united with the Gaṅgā and the Sindhu.

वैतस्तमम्भस्सह सैन्धवेन
युक्तं यथा क्षीरमिवामृतेन ।
लावण्ययुक्तं च यथैव[4] रूपं
शीलेन युक्तं च यथा श्रुतं स्यात् ॥ ३०२ ॥

302. The water of Vitastā mixed with that of Sindhu is like milk mixed with nectar, beauty associated with elegance and knowledge associated with good nature.

शौर्यं यथा स्याद् विनयेन युक्तं
धर्मं यथा स्याद् द्रविणेन युक्तम् ।

---

1. v. 300b om. F
2. गृह्णाति C
3. सङ्गमं C
4. तथैव FG

मृत्सा युता वा मृजयैव[1] राजन्
कामं[2] यथा स्यात् मनसोपपन्नम्[3] ॥ ३०३ ॥
रत्नं यथा स्यात् कनकेन युक्तं
आयु[4]र्यथा स्वास्थ्ययुतं[5] नृवीर ।
सम्मानयुक्तं[6] च यथैव लाभं[7]
तथा तु[8] सा तत्र तदा[9] बभूव ॥ ३०४ ॥

303-4. O king, she became there such as is bravery associated with humility, piety associated with wealth, clay of high quality refined through purification, Kāma associated with mind, gem associated with gold, life associated with health, and profit associated with honour.

तपनस्य सुता देवी गङ्गा स्नेहेन यन्त्रिता ।
बहुमानान्मुनेर्भक्त्या स्वेनांशेन व्यवर्धयत्[10] ॥ ३०५ ॥

वितस्तां तु सरिच्छ्रेष्ठां सर्वकल्मषनाशिनीम् ।
गङ्गा सिन्धुस्तु[11] विज्ञेया वितस्ता यमुना तथा ॥ ३०६ ॥

305-6. Bound by affection, Tapana's daughter—the goddess Gaṅgā—due to the great respect and devotion for the sage, augmented with her own part the Vitastā, the best of the rivers, the destroyer of all sins. The Sindhu should be regarded as the Gaṅgā and the Vitastā as the Yamunā.

---

1. मृतायुतानां FH, मृत्सा युता स्यान्मृजयापि C
2. कामो C
3. मनसोपपन्नः C
4. Thus ADEF, साधुः ed Leiden
5. Thus F, स्वास्थ्युतं D, स्वस्तियुतं AC, स्वस्त्यायुतं ed Leiden
6. समायुक्तं A, सम्मानयुक्तः C
7. लाभः C
8. तथैव C
9. तथा C
10. व्यवर्धयन् F, विवर्धयत् H
11. सङ्गस्तु G, सिन्धुश्च A H

Ed. Leiden v.v. 292b-295

स प्रयागसमो देशस्तयोर्यत्र तु[1] सङ्गमः ।
गङ्गातोयमथादाय गङ्गां तु यमुनाब्रवीत् ॥३०७॥

307. The place, where there is the confluence of these two, should be regarded as equal to Prayāga. Appropriating the water of the Gaṅgā, the Yamunā said to the Gaṅgā:

प्रयागे[2]ऽपहृतं नाम त्वया मे वरर्वाणिनि ।
कश्मीरायां[3] तथा नाम मया चापहृतं तव ॥३०८॥

308. "O possessed of beautiful colour, at Prayāga my name is appropriated by you and in Kaśmīrā your name has been appropriated by me."

तामब्रवीत्ततो[4] गङ्गा भूय एव मया तव ।
हर्तव्यं[5] नाम सुभगे यदाहं सिन्धुसंज्ञिता ॥३०९॥

309. Then the Gaṅgā said to her, "O beautiful one, I must again appropriate your name when I am designated as Sindhu."

बृहदश्वः[6]
इति तथ्यं सतीज्ञात्वा हलमार्गात्तु[7] सिन्धुगा[8] ।
हिमालयान्न[9] प्रययौ पाटितात्मा[10] परं[11] नदी ॥३१०॥

1. तत्र च A
2. Thus other MSS., प्रयागो A
3. कश्मीरेषु C.
4. तत्र H
5. हंतव्यं A G
6. उवाच add D
7. च A
8. सिन्धुतः C
9. हिमाचलान्न E
10. पावितात्मा ed Lahor.
11. पुरं G

310. Having come to know this fact, Satī—the river going in the company of the Sindhu—divided itself and did not go beyond the Himālaya, through the way made with the plough.

पुनस्तां तु महाभागामृषिः प्रोवाच कश्यपः ।
अवश्यं हलमार्गेण गन्तव्यं सुभगे त्वया ॥३११॥

अन्यथा देश एवा[1]यं सरस्त्वमुपयास्यति ।
भूयो भूयश्चोद्यमाना कश्यपेन सरिद्वरा ॥३१२॥

क्रोधात्ततो विनिष्क्रान्ता हलमार्गेण तेन सा ।
तस्मिन् देशे प्रसन्नापि दृश्यते[2] कलुषा नदी ॥३१३॥

311-13. The sage Kaśyapa again spoke to her possessed of great fortune: "O beautiful one, you must necessarily go by the way made with the plough, otherwise the whole country will be turned into a lake." Persuaded again and again by Kaśyapa, that excellent river went in anger through the way made with plough. So, though clear, she is seen as a dirty one at that place.

कश्यप उवाच
वितस्ताख्या सरिद्रूपा देवि त्वं पर्वतात्मजे ।
तपस्विनी परा[3] शर्वा[4]च्छर्वं पत्न्यसि[5] नो नदी ॥३१४॥

314. Kaśyapa said : "Assuming the form of a river called Vitastā, O goddess, the daughter of the mountain, you are not a river (but) an ascetic lady, wife of Śarva, even higher than Śarva.

1. चैव G
2. दृश्यति H
3. पुरा G
4. सिद्धिः C
5. अपि A

अद्रिवत्सासि भद्रं ते तद्देहाच्छृङ्गिणी[1] नदी ।
शम्भुनोढासि रुद्राणी स्रवन्त्यसि मयार्थिता[2] ॥३१५॥

315. May there be happiness for you. You are the daughter of the mountain and on account of (being born) from his body are (called) the mountain-river. O wife of Rudra, you are borne by Śambhu and being requested, you flow (in the form of a river).

त्वय्यर्पितशरीरा ये पापिष्ठाः स्वर्गता अपि[3] ।
दृष्टवा रमन्ते स्वं देहमुह्यमानं[4] तवोर्मिभि[5] ॥३१६॥

316. Those great sinners also who having offered their bodies to you are gone to heaven are pleased to see their bodies carried away by (your) waves.

विस्मयं[6] ते नरा जग्मु[7] दृष्ट्वा तं देहमात्मनः ।
स्वर्गताः स्मोऽथ चोमायां क्रीडामो जलमध्यगाः ॥३१७॥

317. They are surprised to see their bodies (and say), "We are in heaven, and being in the water, are still sporting in (the river which is a form of) Umā.

तवोद्गारैस्तरङ्गाख्यैः[8] देवि मारुतचोदितैः ।
शीतैः[9] शीकरजैर्नृणां नारकोऽग्निः प्रशाम्यति[10] ॥३१८॥

---

1. देहासङ्गिनी AH
2. Thus ACH, च यार्थिता other MSS.
3. अपि सुता A
4. चोह्यमानं A
5. Thus H, तयोर्मिषु A, तयोर्मिभिः G, तयोर्मिभिः other MSS.
6. विस्मायं A
7. गता नरा विस्मयन्ते C
8. तवोद्भागैः A
9. शीतः
10. First and second pādas om. H

318. O goddess, the fire of hell for the human beings is pacified with your cool outpourings called waves, born of water-drops and sent forth by the wind.

प्रदीपादीपिभिर्देवि तथा वर्तिभिरूर्मिभिः[1] ।
त्रिःसप्तनारकं[2] वह्नि नृणां शमयसेऽद्रिजे ॥३१९॥

319. O goddess, born of the mountain, you pacify the fire of three times seven hells for the human beings by means of your waves shining with earthen lamps.

स्नानं ये तु करिष्यन्ति तव पुण्ये नरा जले[3] ।
ब्रह्मलोकं गमिष्यन्ति महापातकिनो ऽपि ते ॥३२०॥

320. Those persons who will take bath in your holy water, shall go to Brahmaloka, even if they have committed Great Sins.

यामीं तु यातनां घोरां भ्रूकुटिभङ्गचोदिताम्[4] ।
स्वप्ने ऽपि[5] पश्यन्ति ते न ये स्नाताप्सु[6] सकृत्तव ॥३२१॥

321. Those who bathe even once in your waters, do not see, even in dream, the dreadful tortures of Yama induced by the contraction of his eye-brows.

तव भक्तस्य विप्रस्य नित्यं कर्मानुतिष्ठतः ।
मोक्षदं मुनयः स्नानं गङ्गायां स्वर्गदं विदुः ॥३२२॥

---

1. कूर्मभिः E
2. नारकिं D
3. जले सुराः A, जले नराः F
4. यामीश्च यातना घोरा भ्रूकुटीभङ्गचोदिताः A,–भ्रूकुटीतटचोदिताः D
5. स्वप्नेऽपि ते न पश्यन्ति DE
6. येप्सु स्नान्ति C

322. The sages know that for a Brāhmaṇa always performing (his) duties, a bath in you is the giver of salvation and a bath in the Gaṅgā is the giver of heaven.

अतिप्रभावयुक्तासि त्रैलोक्यस्यापि पावनी ।
जनित्री सर्वदेवानामुमा देव्यसि नो नदी ॥३२३॥

323. Purifyer of even the three worlds, you are possessed of great influence. O goddess, you are Umā, the mother of all gods and not a river.

देवानां त्वं[1] धृतिर्देवि देवानां भारती[2] यथा[3] ।
तृप्तिश्च सर्वभूतानां निम्नगे त्वं सदा भुवि ॥३२४॥

324. O goddess, (you are) the solidity of gods, the goddess Bhāratī of gods. O river, you are always the satisfaction of all beings on the earth.

प्रसादं कुरु मे देवि निर्गच्छ भवनादितः ।
अविक्षुब्धेन मनसा देशस्यास्य हिते रता ॥३२५॥

325. O goddess, do favour upon me. Engaged in the welfare of this country, go further from this abode with an unannoyed mind.

अर्धं देहाद्धरस्य त्वं देवपत्न्यसि नो नदी ।
सिन्धुसंगमनं यावद् धावन्ती याहि[4] मेऽर्थिता ॥३२६॥

326. You are half of the body of Hara. You are the wife of the God and not a stream who while running to meet Sindhu have been requested by me.

---

1. तु H
2. भारते E
3. Thus A, तथा other MSS.
4. यावन्त्यायाहि A, धावमाने C

Ed. Leiden vv. 312-315

पतिस्ते[1] शङ्करस्त्वेको नापरोऽब्धिरितस्ततः[2] ।
सिन्धुसंगमनेनाशु व्रजस्व स्वपतिं शिवम्[3] ॥३२७॥

327. Śaṅkara alone is your lord and the ocean is not different from Him. Go quickly to your lord Śiva by meeting the ocean.

निशम्यैवं पुनर्देवी सस्मारोक्तं यथा स्वयम् ।
स्मृत्वा[4] सोत्कण्ठिता भर्तु[5]र्गमने मतिमादधे[6] ॥३२८॥

328. Having heard thus, the goddess again remembered her own saying and becoming eager, made up her mind to go to him.

ततो वेगेन महता सीमन्तमिव कुर्वती ।
हिमाचलस्य प्रययौ तोयशैलोपमा[7] नदी ॥३२९॥

329. Then, the stream bearing resemblance to a hill of water, went forth with great force, doing as it were the parting of Himālaya's hair.

ततस्तु संगता नद्या[8] कृष्णया सह पार्थिव ।
तथा सरिद्वराभिश्च शतशो ऽथ सहस्रशः ॥३३०॥

330. O king, then she joined the goddess Kṛṣṇā and hundreds and thousands of other nice rivers.

---

1. पतित्ये A, पतित्वे F
2. यतः C
3. Third and fourth Pādas om. E
4. स्मृता G, स्मिता C
5. Thus CDEF, तस्य A
6. मतिः G
7. Thus D, तोयशल्योपमा G, तोयशीलोपमा A, तोयमार्गेण सा E
8. Thus A, देव्या other MSS.

Ed. Leiden v.v. 316-319

स्वैराजकानां [1] मध्येन मात्राणां चैव भागशः ।
भोगप्रस्थमतिक्रम्य गङ्गया सह संगता ॥३३१॥

331. Passing through the middle of Svairājakas and a part of Mātras, and crossing Bhogaprastha, it joined the Gaṅgā.

एषा हि[2] पापशमनी वितस्ता निम्नगोत्तमा ।
कश्यपस्य तु वाक्येन लक्ष्म्या सह गता क्षितिम् ॥३३२॥

332. Verily this sin-destroying Vitastā—the best of the rivers—appeared on the earth in the company of Lakṣmī, due to the instruction of Kaśyapa.

अदितिश्च दितिश्चैव शची च मनुजेश्वर ।
तपनस्य सुता या च या च गङ्गा सरिद्वरा[3] ॥३३३॥

333. O king, (there appeared) also Aditi, Diti, Śaci, the excellent river Gaṅgā and the daughter of the Sun, i.e. Yamunā.

एवं वसन्त्यां[4] प्रययौ[5] कश्मीरायां[6] चतुर्युगम्[7] ॥३३४॥

पूर्णे चतुर्युगे तस्मिन् कृत्वा धान्यादिसङ्ग्रहम् ।
आश्वयुज्यामतीतायां निर्ययुर्मानवा बहिः ॥३३५॥

334-35. Living thus in Kaśmīrā the four aeons passed. After the completion of those four aeons, at the end of the

1. स्वराजकानां D
2. एषासौCG
3. इति नीलमते वितस्ताजन्म add DEGH, इति श्री नीलमतपुराणे वितस्ताप्रसादवर्णनं नाम षट्त्रिंशोऽध्यायः C Then follows बृहदश्व उवाच CD, verb om. FG
4. वसन्त्या A, वसत्सु C
5. प्रययुः C
6. कश्मीरेषु C
7. चतुर्युगाः C

month of Āśvayuj, the human beings went out after having made collections of rice etc.

काश्यपश्चन्द्रदेवाख्यो वृद्धो ब्राह्मणपुङ्गवः[1] ।
न निर्जगाम निर्वेदाच्चोदितोऽर्थेन भाविना ॥३३६॥

336 An old good Brāhmaṇa named Candradeva—descendant of Kaśyapa—did not go out due to despondancy and due to being ordained by future events.

क्रीडानिमित्तं च[2] भयान्निकुम्भस्य न घातितः ।
ब्राह्मणेन[3] पिशाचास्तु[4] चिक्रीडुस्तेन ते तदा[5] ॥३३७॥

रज्जुबद्धेन तु यथा पक्षिणा नृप दारकाः ।
कल्यमानः[6] पिशाचैस्तु निर्वेदं परमं ययौ ॥३३८॥

337-38. He was not killed due to the fear of Nikumbha and also for the sake of sport. The Piśācas, then, played with that Brāhmaṇa as the little boys (play) with a bird tied to a string. Agitated by the Piśācas, he obtained complete indifference (to worldly objects).

हिमेन शीतेन तथा पिशाचैः
संपीड्यमानो द्विजवृद्धवर्यः[7] ।
बभ्राम तत्रैव विमूढचेता
भ्रमन् ययौ यत्र स नागराजः ॥३३९॥

---

1. मानवपुङ्गवः E
2. तु H
3. Thus GH, ब्राह्मणोऽसौ C ब्राह्मणैस्तैः other MSS.
4. पिशाचैस्तु G, पिशाचाश्च H, पिशाचैस्तैः C
5. Second and third pādas of this verse om. D
6. काल्यमाना AD
7. द्विजवर्यवृद्धिः G

339. Oppressed by the Piśācas and with cold and snow, that old good Brāhmaṇa roamed with a perplexed mind and while roaming, he reached (that place) where (lived) that king of the Nāgas.

यस्मिन् देशे त्वनन्तेन हलं पूर्वं निवेशितम्[1]
तत्र नीलस्य वसतिः पूर्वमेव सुभाविता ॥३४०॥

340. At the place where Ananta had formerly fixed his plough, there (existed) since olden times, the highly exalted abode of Nīla.

एतस्मिन्नेव काले तु नीलो नाग[2]पतिर्विभुः[3] ।
सेव्यमानो निकुम्भेन पिशाचेन महात्मना ॥३४१॥

नागैश्चात्युल्बणै[4] र्भीमैः पर्यङ्कवरमाश्रितः ।
आस्ते गिरिवरस्याधो धनदस्य महात्मनः ॥३४२॥

341-42. At that very time, the mighty Nīla, the lord of the Nāgas, seated on a hice couch under Dhanada, the best of the mountains, was being served by the high-souled Piśāca Nikumbha and highly powerful and dreadful Nāgas.

नागास्तं नागराजानं नागकन्याश्च भूरिशः ।
उपासन्त महात्मानं कश्मीरायां[5] कृतालयाः ॥३४३॥

343. The Nāgas and the Nāga-maidens who had made their abodes in Kaśmīrā, waited in large numbers upon that Nāga-king.

---

1. फलं सर्वं निवेदितम् G, फलं पूर्वं निवेदितम् H
2. नाम–A
3. Thus corrected from प्रभुः by H
4. उल्वलैः E
5. कश्मीरेषु C

केचित् स्तुवन्ति राजानं केचिद् वीजन्ति पन्नगाः[1] ।
केचिद् वरासनगतं[2]पर्युपासन्ति[3] धार्मिकम् ॥३४४॥

344. Some of the Nāgas were praising the king, the others were fanning (him), while others, again, were waiting upon him, the pious one seated on an excellent couch.

तेषां मध्यगतं नीलं नीलाञ्जनचयोपमम् ।
मुकुटेनार्कवर्णेन कुण्डलैश्च विराजितम् ॥३४५॥

विद्युद्द्योतित[4]वर्णेन वाससैकेन[5] शोभितम् ।
चन्द्ररश्मिनिकाशेन तथा चीनांशुकेन[6] च ॥३४६॥

वितानेन विचित्रेण किङ्किणीजालमालिना ।
तथा फणशतै[7]र्भीमैः सप्तभिः संविराजितम्[8] ॥३४७॥

रत्नोज्जवलैर्दीप्तरत्नै[9]र्ज्वालामालासमाकुलम् ।
तं दृष्ट्वा चन्द्रदेवस्य नीलो ऽयमभवन्[10]मतिः ॥३४८॥

नूनं[11] प्रसादात्तस्यैव भुजङ्गाधिपतेः[12] प्रभोः ।

1. First two pādas om. A,—वन्दन्ति भूरिशः H
2. Thus CH, वरासनगताः other MSS.
3. पर्युपासन्त CH
4. Thus A, विद्युद्द्योत other MSS.
5. वंससैकेन A
6. दीनांशुकेन च DF
7. फणिशतैः F
8. Thus C, तं विराजितम्, D सुविराजितम् A
9. Thus ADEF,—दीपरत्नैः C
10. Thus other MSS, अवदन् A
11. ततः C
12. Thus E, भुजगाधिपतेः H

सोपसर्प्य[1] द्विजो नागं कृत्वा प्राध्ययनं[2] पुरः ॥३४९॥

जानुभ्यामवनिं गत्वा तदा स्तोत्रमुदीरयत्[3] ॥३५०॥

345-50. Seeing in their midst, Nīla, resembling a mass of black antimony, shining forth with his ear-rings and the diadem of sun-like colour, adorned with one garment shining like the lightening, and the China-silk resembling the rays of the moon, shining due to a variegated canopy decorated all around with rows of little bells and due to seven hundred terrible snake-hoods radiant with jewels and surrounded by garlands of effulgence spread forth by gems of the lamps studded with gems, Candradeva thought "This must be Nīla." Due to the favour of that mighty lord of the serpents, that twice-born approached the Nāga, did obeisance, touches, the earth with his knees and then pronounced the hymn of praise.

चन्द्रदेवः
नमस्ते नागराजेन्द्र नील नीलोत्पलद्युते ।
नीलमेघचयप्रख्य नीलतोयकृतालय ॥३५१॥

फणानां त्वं शतैर्नाग शोभसे सप्तभिः सदा ।
सप्तसप्तिरिवार्चिष्मान् राजसे त्वं गभस्तिभिः ॥३५२॥

351-52. Candradeva said: "Salutation to you, O Nīla, sovereign-king of the Nāgas, possessed of lustre like that of the blue lotus, resembling a mass of blue clouds, having abode

1. उपसर्प्य G
2. परिक्रमं A, प्रक्रमणं C, स्वस्त्ययनं H
3. उदीरयेत् DEFG, उदैरिरत् C
इति नीलदर्शनम् add DEF, इति श्री नीलमते H, इति नीलमते नीलदर्शनम् A, इति श्री नीलमतपुराणे चन्द्रदेवनीलपरिज्ञानं नाम अष्टत्रिंशोऽध्यायः
Then follows चन्द्रदेव उवाच C, verb om. A

Ed. Leiden v.v. 338b-340

in dark blue waters, you shine, O Nāga, with seven hundred hoods, You blaze forth like the seven-horsed sun, with rays.

त्वं नील नीलार्थं[1] विनीतपापै
देवेश देवैरपि दृश्यसे[2] स्वैः ।
नागेन्द्र[3] भोगीन्द्र[4] इवाम्बरस्थो[5]
ध्यानेन विद्वद्भिरिवामृताख्यः[6] ॥३५३॥

353. O Nīla of dark blue complexion, O lord of the gods, G king of the Nāgas, you —chief of the hooded ones, sitting in the sky and called immortal—are seen, as it were, through meditation, by your own gods who are wise and who have subdued sins.

त्वं नील यज्ञेश[7] इवासनस्थो[8]
वेदार्थविद्भिर्विविधैर्विधानैः ।
संसारकार्येषु[9] सुयागकृद्भि[10]
राराध्यसे मोक्षफलाय विप्रैः ॥३५४॥

354. O Nīla, enthroned like the lord of sacrifice you are propitiated with various rites, for the attainment of salvation,

1. Thus C, corrected thus from नीलर्थि by G, latter reading other MSS., गत्वा तथा नीलार्थिपापैः A, गत्वा नील नीलार्थि पापैः H
2. नेक्ष्यसेद्धा C
3. ध्यानेन E
4. भोगेन्द्रमिव FGH
5. अम्बरस्थं FH, अम्त्ररस्ते G, अम्बरस्थेother MSS.
6. अपीड्यमानः C, इवामृताख्यम् other MSS.
7. Thus C, यज्ञेशमिव other MSS.
8. Thus C,—स्थम् other MSS.
9. संस्कारकार्येषु B
10. सनागकृद्भिः B, सुरागकृद्भिः C

Ed. Leiden v.v. 341-342

by the Brāhmaṇas who know the meaning of the Vedas and perform proper sacrifices in worldly matters.

नागेन्द्र[1] नीलार्चिरिवामरेन्द्रै
विज्ञायसे सूर्य[2] इवाम्बरस्थः[3] ।
त्वं[4] नील नीलार्चिरिव[5] ज्वलानो[6]
भक्तस्य[7]कार्याणि च साधयानः[8] ॥३५५॥

355. O lord of the Nāgas, the chiefs of the gods recognize you as fire and as the sun in the sky. Shining like fire, O Nīla, you accomplish the deeds of your devotees.

दृष्टो[9] मया हेतुभिरापतन्तं
सर्वस्य जन्तोर्वससे यतोऽद्य ।
स्मृतस्ततो मोक्षय मेऽतिदुःखात्
त्रायस्व विप्रस्य नमो नरेन्द्र[10] ॥३५६॥

356. By me you have been seen as appearing for some reason, though you dwell in all the beings. Then remembered, you release[6] me from the great calamity. Salutation to you, O lord of men, protect (this) Brāhmaṇa.

---

1. नागेश नीलार्चिरिवामरेशैः C
2. Thus C, सूर्यम् other MSS.
3. Thus C,—स्थम् other MSS.
4. Thus ABCDF, त्वां E
5. Thus C, नीलार्चिम् other MSS.
6. उज्वलंश्च C, ज्वलंश्च G, ज्वलन्तं ABDEFH
7. स्वभक्तकार्याणि G
8. विधास्यमानः C, साधयन्तम् other MSS.
9. Thus C, दृष्टं other MSS.
10. नगेन्द्र DEF

त्वं नील[1] नीरौघचयप्रकाशो
विराजसे[2] विष्णुरिवामरेशः[3] ।
विधे विंधाता रमसे[4] यमेशं[5]
त्वं[6] वासुदेव[7]प्रणतः सदैव[8] ॥३५७॥

357. O Nīla, shining with the multitude of water-torrents, you shimmer like Viṣṇu, the lord of the immortals. Being a creator of the creator, you enjoy the company of the lord of Yama and always bow down before Vāsudeva.

त्वां[9] नील नीलाम्बर नीलनेत्र[10]
आकाशवत् सर्वगतं सुरेशम् ।
ध्यात्वा[11] नरो योऽप्यजितेन्द्रियो वा
नागेन्द्र मुच्येत तव प्रसादात् ॥३५८॥

358. Clad in blue raiment and possessed of blue eyes, O Nīla, O lord of the Nāgas, even a man of unrestrained senses who contemplates you—the lord of the gods and all pervading like the Ether—is saved by your grace.

---

1. नीर G
2. Thus B, विडौजसे ADFGHD
3. Thus AC, अमरेशं H, अमरेशः other MSS
4. रमसी A
5. यमीशं A, फणीश C
6. त्वां C
7. वासुदेवं CG
8. प्रणतोऽस्मि नित्यम् C.

Third and fourth pādas of v. 357 and first two pādas of v. 358 om. H

9. त्वं ABDEF
10. नेत्रम् AFG
11. ध्यायन् C

नील त्वामेव वेदार्थे जगु र्वेदाः सनातनम् ।
ध्येयं वह्नौ[1] मुमूक्षूणां कामिनां चार्थसाधनम् ॥३५९॥

359. O Nīla, the Vedas have sung about you—the eternal one—as the essence of the Vedas, the object of worship in the fire, the fulfiller of the desires of those who seek salvation and those who are ambitious (of material gain).

त्वत्प्रकाशं यतो[2] ब्रह्म निष्कलं निर्मलं[3] परम् ।
सूक्ष्मतो व्योम[4]निर्दिष्टं सर्वगात्रैरकृत्रिमम् ॥३६०॥

360. Illumined by you the Brahma is indivisible, pure and the highest. Due to its minuteness, it is called Ether and is even with all the limbs, uncreated.

अकिञ्चन्यावदस्तत्त्वम[5]तिसूक्ष्मस्य नो पृथोः[6] ।
अर्थाश्रयान् महार्थत्वं[7] तव[8] तस्याक्षरस्य च[9] ॥३६१॥

361. O Akiñcanya, you, too, have not been able to explain the true essence of that highly minute (and still) great one. For being the support of all the elements, you are the great essence of your ownself and of that imperishable one,

कद्रूः पुत्रसहस्रेण नागराजेन्द्र शोभिता ।
त्वया तु राजते[10]ऽत्यर्थं विष्णुनेवादितिर्यथा ॥३६२॥

---

1. ब्रह्मH
2. इतो A
3. निर्मलं निष्कलं C
4. येन—CH
5. अकिञ्चनोऽसि देव त्वम् C
6. अति सूक्ष्मोसि च पृथु: C
7. अथाश्रयो महार्थस्त्वं C
8. स्तव्यः C, तत्र H
9. तस्याहरस्य E
10. शोभते E

362. O Lord of the Nāga-kings, Kadrū adorned with a thousand sons shines exceedingly by you only as Aditi by Viṣṇu only.

त्वमेव तपसात्यर्थं तथा विद्योतसे प्रभो[1] ।
तोयं हिमं शीकरं च[2] तथा मुञ्चसि धार्मिक[3] ॥३६३॥

363. O Lord, you alone shine so much with penance and send forth water, snow and showers.

प्रजापतिः कश्यपो हि सर्वभूतपिता प्रभो[4] ।
त्वया तु शोभतेऽत्यर्थं पुत्रेणात्यन्तधार्मिक ॥३६४॥

364. O highly pious one, Prajāpati Kaśyapa—the father of all beings—is adorned exceedingly by having you as a son.

त्वयि धर्मश्च सत्यं च क्षमा च सततं प्रभो ।
देवासुरविमर्देषु शतशोऽथ सहस्रशः ॥३६५॥

त्वया[5] विनिहता[6] दैत्या देवब्राह्मणकण्टकाः ।
वरदस्त्वं वरेण्यश्च सुरारिबलहा[7] प्रभो[8] ॥३६६॥

365-66. O Lord, in you there is piety, truth and forbearance. In the wars amongst the gods and the demons, you have slain hundreds and thousands of the demons who were (like) thorns for the gods and the Brāhmaṇas. O mighty one, you

1. तथा E
2. शर्करं F
3. These two pādas om. AH
4. These two om. AH
5. तदा C
6. विनिहतो C
7. वरारि—ACEFG वारिबहल H
8. Thus A, विभो other MSS.

are the giver of the boons, worthy of attainment and slayer of the armies of the enemies of the gods.

भक्तानुकम्पी भक्तश्च देवदेवे जनार्दने ।
तस्यातिदयितश्चासि यथा नागः स वासुकिः ॥३६७॥

367. Having compassion on your devotees, you are highly devoted to Janārdana, the god of the gods. You are exceedingly dear to Him as is that Nāga Vāsuki.

धनदस्ते सखा नाग यथा शर्वस्य नित्यदा ।
धनदश्चासि भक्तानां[1] धनेश इति विश्रुतः ॥३६८॥

368. O Nāga, the Dhanada ("Wealth-giver", the name of a mountain) is always your friend as of Śiva. Well-known as the lord of wealth, you give wealth to (your) devotees.

नागानां त्वं गति र्नित्यं देवानामिव[2] वासवः ।
भक्तिमानस्मि ते नित्यं तच्च जानासि धार्मिक[3] ॥३६९॥

369. You are the refuge of the Nāgas as Indra is of the gods. O pious one, know that I am full of devotion for you.

नील उवाच
स्वागतं ते द्विजश्रेष्ठ दिष्ट्याऽसि मेऽन्तिकम् ।
अर्चनीयोऽसि विप्रेन्द्र ह्यतिथिस्त्वं मतो मम[4] ॥३७०॥

370. Nīla said: "Hail to you, O best among the twice-born. O lord of the Brāhmaṇas, Luckily you have approached

1. दैत्यानां E
2. अपि H
3. नीलमते नीलस्तोत्रम् add ADEFG, इति श्री—H, इति श्री नीलमतपुराणे चन्द्रदेवकृतं नीलस्तोत्रवनं नामकोनचत्वारिंशोऽध्यायः C
4. 370 b occurs before 370 a in E

me and are to be honoured as you have been regarded as a guest by me.

वरं वरय भद्रं ते यथेष्टं मनसि प्रियम् ।
गृहं च मे तथा पश्य तत्र आस्स्व[1] च यथासुखम् ॥३७१॥

371. Happiness to you! Ask for a boon which is desired by you and is dear to your heart. Visit my home and stay there as it may please you."

चन्द्रदेवः[2]
अवश्यं मे[3] वरो देयस्त्वया नागेन्द्रसत्तम ।
वरयामि वरं देव तं मे त्वं दातुमर्हसि ॥३७२।

372. Candradeva (spoke): "O best among the Nāga-chiefs, you must give me a boon. I ask for a boon and you are worthy of granting that to me.

कश्मीरायां[4] जनो नित्यं वसतां भीमविक्रम ।
क्लिश्यते हि सदा लोको निष्क्रमन्[5] प्रविशन् पुनः ॥३७३॥

373. O possessed of terrible prowess, let the human beings live constantly in Kaśmīrā. The people are always oppressed in going away and coming again.

गृहाणीह नरास्त्यक्त्वा पुराणि विविधानि च ।
वसन्तु त्वत्प्रसादेन वरमेतद्वृतं[6] मया ॥३७४॥

---

1. Thus C, तत्रास्व other MSS.
2. उवाच add G
3. Thus A, मे other MSS.
4. कश्मीरेषु CG
5. निष्क्रामन् CG
6. वर एष वृतो CG

Ed. Leiden v.v. 359-362

374. Leaving their homes and cities of various sorts, the human beings ....[1] May they live (here) with your favour. This is the boon I solicit for.

नीलः[2]
एवमस्तु द्विजश्रेष्ठ वसन्त्विह नराः सदा ।
पालयन्तस्तु[3] मद् वाक्यं केशवाद् यन्मया श्रुतम् ॥३७५॥

375. Nīla (said): "O best among the twice-born, it will be so. Acting upon my instructions received by me from Keśava, the human beings may live here constantly."

बृहदश्वः[4]
एवमुक्त्वा तदा नीलो ब्राह्मणं स्वं निवेशनम्[5] ।
नीत्वा सम्पूज्य सम्भोज्य[6] ब्राह्मणस्य[7] यथाविधि ॥३७६॥

कश्मीरायां वसत्यर्थ[8]माचाराणि[9] जगाद वै ।
द्विजश्चोवास षण्मासान् सुखं[10] नीलनिवेशने ॥३७७॥

376-77. Saying thus, Nīla took the Brāhmaṇa to his home, worshipped him, fed him properly and told him the practices (to be followed) for living in Kaśmīrā. The Brāhmaṇa also lived happily in the home of Nīla for six months.

चैत्र्यां ततो व्यतीतायां प्राविशत्[11]सर्वतो जनः[12] ।
राजा वीरोदयाख्यश्च हस्त्यश्वैर्बहुभिर्वृतः ॥३७८॥

---

1. Some verses seem to be lost here.
2. उवाच add CG
3. पालयन्तु च A
4. उवाच add CD
5. First two pādas of this verse om. A
6. संभोज्य संपूज्य CG
7. ब्राह्मणं तं CG, ब्राह्मणं च H
8. काश्मीरवासहेत्वर्थं CG
9. सदाचारां CG
10. Thus corrected from सुखी by A, former reading H, सुखी C
11. प्राविशन् CG
12. जनाः CG

Ed. Leiden v.v. 363-366

378. When the (full moon night) of Caitra had passed, men poured in from all sides and there came also the king named Vīrodaya surrounded by many horses and elephants.

प्रविष्टे तु[1] जने तस्मिन्[2] द्विजो नीलेन योजितः
युवा धनौघसहितो[3] ययौ वीरोदयं[4] नृपम् ॥३७९॥

तस्य सर्वं[5] यथा वृत्तं कथयामास स द्विज[6]।
राजापि सर्वलोकेषु कथयामास पार्थिव ॥३८०॥

379-80. When the human beings had entered, the young Brāhmaṇa appointed by Nīla approached king Vīrodaya with hoards of wealth and related to him the whole account. The king also related the whole incident to all the people.

नीलोक्तं वचनं कुर्वंस्ततः प्रभृति वै जनः।
उवास सततं हृष्टः कश्मीरायां[7] कृतालयः ॥३८१।

381. Since then, human beings acting upon the instructions of Nīla lived happily in Kaśmīrā after constructing houses there.

कृत्वा पुराणि ग्रामाणि[8] तीर्थान्यायतनानि च।
गृहाणि च विचित्राणि ह्युवास[9] वसंति जनः ॥३८२॥

1. प्रविष्टेषु CG
2. जनौघेषु CG
3. जनौघसंहितो AH
4. वीर्योदयं H
5. सम्यक् E
6. Thus corrected from स द्विजः by A
7. कश्मीरेषु CG
8. ग्रामांश्च CG
9. चकार CG उवास A

382. Having constructed various sorts of houses, temples, sacred places, villages and cities, the people lived in that dwelling-place.

ततः[1] प्रभृति देशेऽस्मिन् स्वल्पं हि पतते[2] हिमम् ।
जनस्तु[3] नीलवचनं[4] पालयत्येव नित्यशः[5] ॥३८३॥

383. Since then, very little snow falls in this country and the people always obey the words of Nīla.

वैशम्पायनः[6]
एवमुक्तः स गोनन्दो[7] बृहदश्वेन भूभुजा[8] ।
पप्रच्छ भूयस्तमृषिं जातकौतूहलस्तदा[9] ॥३८४॥

384. Vaiśampāyana (said): Told thus by Bṛhadaśva, king Gonanda, possessed of curiosity, asked that sage again:

कान्याचाराणि[10] नीलेन चन्द्रदेवाय भार्गव ।
पुरा प्रोक्तानि[11] चैतानि[12] कथयस्व महाद्युते[13] ॥३८५॥

1. तदा C
2. निपतति CG
3. जनाश्च CG
4. वाक्यानि CG
5. पालयन्तोऽनिशं मुदा CG,—सर्वदा E, नित्यदा H
6. उवाच add CG
7. गोविन्दो DH
8. भूमिपः CG
9. गोनन्दः add CG, उवाच add C
10. का आचाराश्च CG
11. प्रोक्ताश्च CG
12. तान् मह्यं CG
13. महामते CG, महामहे A

385. O descendant of Bhṛgu, possessed of great lustre, tell me as to which were the holy practices which Nīla, formerly, pronounced to Candradeva?

बृहदश्वः[1]
रौक्मपीठस्थितं[2] विप्रं नागः पर्यङ्कमाश्रितः[3] ।
उवाच यत्तदा राजंस्तच्छृणुष्व समाहितः ॥३८६॥

386. Bṛhadaśva (said): O king, listen attentively to that which the Nāga—seated on a couch—told the Brāhmaṇa seated on a silver stool.

नीलः[4]
प्रणिपत्य हृषीकेशं पराशरं गुरुं[5]हरिम् ।
कश्मीरायां[6] वसत्यर्थं[7] वक्ष्याम्याचरणं तव ॥३८७॥

387. Nīla (said): "Having bowed before Hṛṣīkeśa Hari the preceptor of Parāśara, I shall relate to you the practice (to be followed) for living in Kaśmīrā.

आश्वयुज्यां निकुम्भस्तु नित्यमायाति काश्यप[8] ।
हत्वा पिशाचान् संङ्ग्रामे वालुकार्णवगान् बहून् ॥३८८॥

388. O son of Kaśyapa, on Āśvayujī always, there comes Nikumbha, after killing in battle, many Piśācas gone to the sea of sand.

---

1. उवाच add C
2. शैक्यं पीठं स्थितो A, रौक्मपीठस्थितो नागः H
3. पर्यङ्कञ्च तथाश्रितः AH, पर्यङ्कमास्थितः G
4. उवाच add CG
5. चराचरगुरुं A, पराशरगुरुं H
6. कश्मीराणां CG
7. च सत्यर्थं A
8. कश्यप A

पूजार्थं तस्य कर्तव्या[1] कौमुदी[2] तां निबोध मे[3] ।.३८९।।

389. The full moon night should be celebrated for his worship. Know that from me.

सुधावदाताः[4] कर्तव्याः[5] पूजिताश्च तथा गृहाः[6] ।
पुम्भिः स्नातानुलिप्तैश्च भाव्यं[7] बालैर्विशेषतः ।।३९०

390. The houses should be white-washed and worshipped. Men, especially the children, must take bath and anoint themselves.

न भोक्तव्यं दिवा चापि तद्दिनं पुरुषैः सदा[8] ।
केवलं भोजनं देयं बालातुरजनस्य च ।।३९१।।

391. Men should not eat anything on that day. Food should be given only to the children and the sick.

सफलैः[9] पुष्पसङ्घातैः[10] पूजनीयास्तदा[11] गृहाः[12] ।
चन्द्रोदये ततः प्राप्ते सम्प्रज्वाल्य हुताशनम् ।।३९२।।

---

1. कर्तव्यः F
2. कामुदी C
3. ते CG, second pāda om. EF
4. सुधावधाता A
5. कर्तव्या om. H
6. ग्रहस्तथा F, First two pādas om. EF
7. सार्धं E
8. सह A
9. भोजनैः E, सत्फलैः CG
10. Thus A, सफलैः पत्रैः E पत्रसंघातैः CGH
11. तथा CG
12. ग्रहाः E

Ed. Leiden v.v. 377-380

रुद्रं चन्द्रमुमां स्कन्दं नासत्यौ नन्दिनं तथा ।
पूजयित्वार्घमाल्यादिनैवेद्यै[1]श्च पृथक् पृथक् ॥३९३॥

392-93 The houses should be worshipped with heaps of leaves along with fruits. Having kindled fire after the rise of the moon, one should worship Rudra, moon, Umā, Skanda, two Nāsatyas and Nandī, each one separately with water of honour (argha), garlands and eatable offerings.

ततः पूजा निकुम्भस्य कर्तव्या कृसरेण तु ।
आदित्यपुत्रो रेवन्तः[2] साश्वैः[3] पूज्यश्च[4] मानवैः ॥३९४॥

394. Then Nikumbha should be worshipped with Kṛsara (rice mixed with pulse). Men possessed of horses should worship Revanta, the son of Āditya.

पूजनीया च[5] सुरभि[6] र्गोमद्भिः पुरुषैस्तथा[7] ।
येषां च छागलाः[8] सन्ति तैश्च पूज्यो हुताशनः ॥३९५॥

395. Persons possessing cows should worship Surabhi and those who have got goats should worship fire.

औरभ्रिकै[9]स्तथा देवः पूजनीयो जलाधिपः
येषां सन्ति करीन्द्राश्च[10] तैश्च पूज्यो गणाधिपः ॥३९६॥

---

1. Thus A, पूजनीयाश्च—D, पूजनीयाश्चमाल्यादिनैवेद्यं F, पूजयेत च सन्माल्यैः CG, पूजनीयाश्चं माल्याद्यैः H
2. Thus CH, रेवन्दः other MSS.
3. Thus DEF, साश्वः ACG
4. पूज्यः स H
5. पूजनीयाश्च CG, पूजनीयश्च H
6. मुनयो CG
7. तदा H
8. Thus CDEFH, छशिलाः A
9. औरभ्रकैः A
10. करीन्द्राणि ed Leiden, करीन्द्रा वै H

Ed. Leiden v.v. 381-384

396. Shepherds should worship the god (Varuṇa), the lord of waters, and those who own elephants should worship the lord of the Gaṇas.

कृत्वाग्निहवनं पश्चात् पूजयित्वा द्विजोत्तमान्।
प्रयुज्य चात्मनः पूजां भोक्तव्यं मांसवर्जितम् ॥३९७॥

397. Having performed sacrifice in the fire and having worshipped the best Brāhmaṇas, one should worship one's own-self and eat vegetarian food in the company of friends, servants, wife, children etc.

सार्धं भृत्यैस्तथा मित्रै[1]र्दारापत्यादिभिस्तथा।
वस्तव्या[2] च निशा सैव वह्नेः पार्श्वरतै[3] र्नरैः ॥३९८॥

398. That night should be passed by men in the vicinity of fire, amidst all sorts of vocal and instrumental music mingled with the sound of conches.

शंखवादरवोन्मिश्रै र्गीतवाद्यैश्च[4] नित्यशः[5]।
नेया भवति राजेन्द्र तथा प्रेक्षणकैः[6] शुभैः ॥३९९॥

तथा प्रभातसमये स्वनुलिप्तैः[7] स्वलङ्कृतैः।
वह्निपूजा च कर्तव्या मङ्गलालभनं तथा ॥४००॥

399-400. O king, (that night) should be passed with good dramatic performances. Then, early in the morning, the persons—well anointed and well adorned—should perform fire-worship and the ceremony of touching auspicious things.

---

1. Thus A, मित्रैस्तथा भृत्यैः DEH
2. वास्तव्या H
3. वह्निपार्श्वगतैः CG
4. गीतवाद्यैश्च CG
5. सर्वशः CDEFH
6. प्रक्षणिकैः A
7. Thus CG, स्वानुलिप्तैः ADE

Ed. Leiden v.v. 385-388a

भोक्तव्यं सह मित्रैश्च क्रीडितव्यं यथासुखम् ।
सुप्तव्यं[1] तां[2] तथा रात्रिं[3] द्वितीयायामनन्तरम्[4] ॥४०१॥

401. One should feast in the company of friends and should play to one's contents. One should sleep that night, and afterwards, on the next one.

कर्दमेनानुलिप्ताङ्गैः क्रीडितव्यं तथा[5] नरैः[6] ।
सुहृदः कर्दमेनापि[7] लेपयद्भि[8]रितस्ततः ॥४०२॥

कामार्थवादिभिस्सर्वै[9] स्तल्लिङ्गार्थप्रबोधकैः ।
गन्तृ[10]गम्यविशेषैश्च विविधैश्च सुभाषितैः ॥४०३॥

अश्लीलं वदमानैश्च[11] त्वा[12]क्रोशद्भिस्तथा द्विज[13] ।
तस्मिन्नहनि पूर्वाह्णे निकुम्भस्यानुयायिनः[14] ॥४०४॥

आविशन्ति नरान् सर्वान् पिशाचा घोरदर्शनाः ।
यश्चैवं कुरुते तस्य ह्[15]यपराह्णे तदा तनुम् ॥४०५॥

---

1. स्वप्तव्यं CG
2. च CG
3. तस्यां CG
4. द्वितीयस्यां निशीच्छया CG
5. यथा F
6. वरात् C, भरात् G
7. अपि om. and space left H
8. लेपनीयाः CGH
9. कामार्थवादनिरतैः CG
10. भर्तृगम्य—DE
11. अश्लीलानि वदद्भिश्च CG
12. तथा CG, हि H
13: एव च CG, द्विजैः H
14. Fourth pāda om. A.
15. Thus CDE, हि om. and absence of सन्धि A

Ed. Leiden v.v. 338b-339a

त्यक्त्वा स्नातस्य गच्छन्ति शपन्ते[1] चाप्य[2]कारणम् ।
ततः स्नातैश्च कर्तव्यं केशवस्यार्चनं नरैः ॥४०६॥

402-6. People—with all parts of their bodies smeared with mud; besmearing their friends here and there with mud; speaking, for the sake of love, various beautiful utterances concerning persons having sexual intercourse and the women fit for cohabitation, instigating sex-instinct; saying indecent words and crying aloud—should play. On that day, in the morning, the Piśācas of dreadful sight—the followers of Nikumbha—enter all the human beings. In the evening, they leave the body of one who does so and is bathed and enter that of another, cursing him, who does not do so. Then the bathed persons should worship Keśava.

सम्पूज्य विप्रान् भोक्तव्यं तनुलिप्तैः[3] स्वलङ्कृतैः[4] ।
मित्रानुजीविभिः सार्धं दारापत्यादिभिस्तथा[5] ॥४०७॥

ततः प्रभृति षण्मासान् स्वेषु वेश्मसु मानवैः ।
अग्निः सन्निहितः कार्यो रात्रौ विप्रैर्विशेषतः ॥४०८॥

407-8. With their bodies anointed and well-adorned, they should worship the Brāhmaṇas and feast themselves in the company of friends, servants, wives and children. Since then, the human beings, especially the Brāhmaṇas, should keep the fire kindled in their houses, at night, for a period of six months.

1. शापान्ते E
2. चास्य कारणम् A, करणाद्ध्रुवम् CG
3. लिप्तदेहैः CG
4. सुसंयतैः H
5. दारापत्यसमन्वितम् CG

Ed. Leiden v.v. 393b-396a

रात्रौ दीपश्च दातव्यो[1]मासमेकं बहिर्गृहात् ।
यावत्कार्त्तिकमासस्य पौर्णमासीं[2] द्विजोत्तम ॥४०९॥

एषा तु कौमुदी नाम तिथिः कार्या शिवप्रदा[3] ।
ततः पक्षे व्यतीते तु कर्त्तव्या सुखसुप्तिका ॥४१०॥

409-10. A lamp should be placed outside the home, at night, for one month. Till the full-moon night of Kārttika, this Kaumudī—the giver of bliss—should be celebrated. Then after the passing away of that fortnight, there should be the celebration of "Sleep with happiness" (Sukha Suptikā).

पञ्चदश्यां यथा विप्र तथा मे गदतः शृणु ।
तस्यां[4] दिवा[5] न भोक्तव्यं बालातुरजनं विना ॥४११॥

411. O Brāhmaṇa, listen to me who am saying as to how is that to be celebrated on the fifteenth. None except the sick and the children should take meals on that day.

सूर्ये त्वस्तमनुप्राप्ते पूजयित्वा करीषिणीम् ।
दीपवृक्षास्ततो देया देवतायतनेषु च ॥४१२॥

चतुष्पथश्मशानेषु नदीपर्वतवेश्मसु ।
वृक्षमूलेषु गोष्ठेषु चत्वरेष्वापणेषु च ॥४१३॥

412-13. After sun-set, one should worship Lakṣmī and then lamp-trees should be placed in the temples of the gods, cross-

1. कर्तव्यो H
2. पौर्णमासी DE
3. शुभप्रदा DF. After this occurs नील उवाच EG, नील: AF, इति श्रीनीलमतपुराणे आश्वयुजीमहवर्णनं नाम प्रथमोऽध्याय: नील उवाच C
4. तस्या A
5. देव्या A

ings of the roads, cremation grounds, rivers, hills, houses, bases of trees, cow-pens, court-yards and shops.

वस्त्रैश्चैवापणाः सर्वे कर्तव्या द्विज शोभिताः[1] ।
दीपमालापरिक्षिप्ते प्रदेशे तदनन्तरम् ॥४१४॥

स्वलङ्कृतेन[2] भोक्तव्यं द्विजेन्द्र नववाससा[3] ।
सुहृद्भिर्बन्धुभिः[4] सार्धं ब्राह्मणै[5] श्चानुयायिभिः ॥४१५॥

414-15. O twice-born, all the shops should be decorated with clothes. After that, in the place surrounded by rows of earthen lamps, O lord of the twice-born, a person, well adorned and dressed in new, should eat in the company of friends, relatives, the Brāhmaṇas and servants.

ततः प्राप्ते द्वितीयेऽह्नि स्वनुलिप्तैः स्वलङ्कृतैः ।
क्रीडितव्यं तदा[6] द्यूतैः श्रोतव्यं गीतवादितम् ॥४१६॥

416. Next day, the persons—well anointed a ndwell decorated should gamble and listen to vocal and instrumental music.

विशेषवच्च भोक्तव्यं[7] पूर्वोक्तैस्तैर्जनैः सह ।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरः शुभः ॥४१७॥

417. They should also feast in the company of the persons mentioned above. For him who wins in that gambling, the year is auspicious.

---

1. श्चोपशोभिताः CG
2. स्वलङ्कृतैश्च CG
3. नववस्त्रैः CG
4. Thus A, ब्राह्मणैः other MSS.
5. Thus A, बन्धुभिः other MSS.
6. तु तद् F, तथा A
7. Thus other MSS., गीतवादिकं A

तस्यां रात्र्यां[1] तु कर्तव्यं शय्यास्थानं[2] सुशोभितम्[3] ।
गन्धैर्वस्त्रैस्तथा धूपै[4] रत्नैश्चैवाभ्यलङ्कृतम्[5] ॥४१८॥

दीपमालापरिक्षिप्तं तथा[6] धूपेन[7] धूपितम् ।
दयिताभिश्च सहितैर्नेया[8] सा च निशा भवेत् ॥४१९॥

418-19. During that night, the place where the beds are placed, should be well-decorated with perfumes, clothes, incense and jewels. It should also be surrounded by lines of lamps and perfumed with incense. That night should be spent by them in the company of wives.

नवैश्च वस्त्रैः पूज्याश्च[9] सुहृत्सम्बन्धिबान्धवाः ।
ब्राह्मणा भृत्यवर्गाश्च चन्द्रदेव यथाविधि[10] ॥४२०॥

420. O Candradeva, the friends, the relatives made by marriage and the maternal relatives should be honoured with new clothes and so also the Brāhmaṇas and the servants in the proper manner.

---

1. रात्री CDEFG
2. Thus CDEG, यथास्थानम A, यथा written above शय्या H
3. सुशोभनम् H
4. Thus CDEFG, दीपै: AH
5. चाप्यलङ्कृतम् CG
6. तदा D
7. दूपेन A
8. नीया A
9. पूज्याश्च नूतनवासोभि: CG
10. नील उवाच add CDEG, नील: AF, इति श्री नीलमते नील: add H, दीपमाला विधि added on the margin by another hand H, इति श्रीनीलमतपुराणे दीपमालाया वर्णनं नाम द्वितीयोऽध्याय:। Then follows नील उवाच C

Ed. Leiden v.v. 405 407

एकादश्यां ततो रात्रौ शुक्लपक्षस्य मानवः ।
सोपवासो हरिं देवं नृत्तगीतै[1]र्विबोधयेत् ॥४२१॥

421. On the eleventh night of the bright half of the month, the man observing fast should wake up God Hari with songs and dances.

आषाढमासि प्रतिमां केशवस्य च[2] कारयेत् ।
सुप्तां तु शेषपर्यङ्के शैलमृद्धेमदारुभिः[3] ॥४२२॥

ताम्रारकूटरजतै[4]श्चित्रे वापि निवेशयेत् ।
लक्ष्म्युत्सङ्गगतौ पादौ तदा तस्य[5] तु[6]कारयेत् ॥४२३॥

422-23. In the month of Āṣāḍha, Keśava's statue, sleeping on the couch in the form of Śeṣa, should be made of stone, clay, gold, wood, copper, brass, silver or He may be painted in a picture. His feet should be shown in the lap of Lakṣmī.

कार्त्तिकस्य तु[7] शुक्लान्ते कार्यं तस्य विबोधनम्[8] ।
यथा[9] तया मे गदतः शृणु त्वं मुनिपुङ्गव ॥४२४॥

424. O excellent sage, know from me the way in which that (deity) is to be awakened at the end of the bright half of Kārttika.

---

1. Thus DEH नृत्तैर्गीतैः A, नृत्यगीतैः CG
2. Thus A, तु other MSS.
3. शैलमृद्धेमदारुनिः A
4. Thus CDEFGH, रजते A, रचितैः ed Leiden
5. तस्यां CG
6. च A
7. च A
8. निबोधनम् GH
9. तथा F

Ed. Leiden v.v. 408-411

एकादश्यां तु कर्तव्यं रात्रौ जागरणं[1] तथा ।
गीतैर्नृत्तैस्तथा वाद्यैर्ब्रह्मघोषैस्तथैव च ॥४२५॥

वीणापटहशब्दैश्च पुराणानां च वाचनैः ।
तत्कथाश्रवणैश्चान्यैस्तथा स्तोत्रप्रकीर्तनैः ॥४२६॥

प्रेक्षणीयप्रदानै[4]श्च भूमिशोभाभिरेव च ।
पुष्पधूपप्रदानै[5]श्च नैवेद्यैर्विविधैस्तथा ॥४२७॥

425-27. During the night of the eleventh, vigil should be observed with songs, dances, instrumental music, Brahmaghoṣa, the sounds of Vīṇā and Paṭaha, recitation of the Purāṇas, hearing of the Puranic stories, singing of devotional hymns, presentation of dramatic performances, charities, earth-decorations, offerings of flowers and incenses, various sorts of eatable offerings, trees of lamps, and various sorts of fire-worships.

दीपवृक्षैश्च विविधैर्वह्निपूजाभिरेव च ।
भक्ष्यैरपूपैः शाकैश्च परमान्नैस्तथा फलैः[6] ॥४२८॥

इक्षोर्विकारैर्मधुना मृद्वीका[7]भव्यदाडिमैः ।
कुठेरकस्य[8] मञ्जर्या मार्जन्या लवणेन[9] च[10] ॥४२९॥

---

1. रात्रि जागरणं DEF, रात्रौ जागरणस्तथा A
2. Thus AC, नृत्यैः DE
3. वादनम् H
4. प्रेक्षणीयैः प्रधानैश्च CG, प्रेक्षणीयप्रधानैश्च H
5. पुष्पधूपःप्रधानैः AGH
6. फलैस्तथा DFG
7. Thus ACG, मृद्वीकैः F, माध्वीकैः H
8. कुण्ठेरकस्य A
9. लवनेन CG
10. तत् E

रक्तसूत्रेण रक्तेन चन्दनेन सितेन च ।
अलक्तकेन बीजैश्च[1] कुङ्कुमेन सुगन्धिना ॥४३०॥

सम्पूज्य प्रतिमां रात्रौ द्वितीयेऽह्नि पण्डितः ।
स्नात्वा नदीजले पुण्ये प्रतिमां स्नापये[2]च्छुभाम्[3] ॥४३१॥

428-431. Having worshipped the image at night, with eatables like cakes, vegetables, rice boiled in milk, fruits, preparations of sugar-cane, honey, grapes, pomegranate, holy basil, and salt; with brush, red thread, red and white sandlewood, Alaktaka paint, seeds and fragrant saffron, the wise should wash the auspicious image after taking bath in the holy water of a river.

उत्थितां तु[4] परं[5] ब्रह्मन् पूर्वद्रव्यविनिर्मिताम् ।
यदि चित्रनिविष्टा स्यात् प्रतिमा ब्राह्मणोत्तम[6] ॥४३२॥

पञ्चरात्रविधानेन[7] वेद्यामावाह्य तां बुधः ।
आसनस्थां यथाशक्त्या[8] स्नापयेत्स यथाविधि ॥४३३॥

आदावाज्येन तैलेन मधुना तदनन्तरम् ।
दध्ना क्षीरेण च ततः[9] पञ्चगव्येन चाप्यथ ॥४३४॥

432-34. That awakened image made of the above-mentioned materials—if the figure be painted in a picture—.........should be carried on an altar and the wise should bathe that (image) placed on the seat, in the proper manner, in accordance with the rules of the Pañcarātra and according to one's means

1. Thus other MSS., बीजेन A
2. Thus DEF, स्थापयेत् ACG
3. शुभम् C
4. तां CG
5. पराम् DEG
6. तस्यां स्नानादि कर्तव्यं बुधैश्चित्रोपचारतः add C
7. निदानेन A
8. यथाशक्ति CG
9. Thus CG, च तथा DE, व तथा A

Ed. Leiden v.v. 417-421

firstly with clarified butter, oil, honey; then with curd and milk, and then with the five preparations of cow's milk.

उद्वर्तनं ततो देयं माषचूर्णं[1] ततः[2] परम् ।
ततो मसूरचूर्णं[3] च[4] ततस्त्वामलकानि[5] च ॥४३५॥

रोध्रं[6] कालेयकं चैव[7] तगरं[8] कर्णकं[9] तथा ।
सिद्धार्थकं प्रियङ्गु[10] च ततो वै बीजपूरकम्[11] ॥४३६॥

सर्वौषध्यः सर्वगन्धाः[12] सर्वबीजानि काञ्चनम्[13] ।
मङ्गल्यानि यथालाभं रत्नानि[14] च कुशोदकम् ॥४३७॥

हस्तिदन्तोद्धृता[15] मृच्च वृषभृङ्गोद्धृता तथा ।
नदीतीरात्सगोस्थानाद् वल्मीकात् सङ्गमाद्ध्रदात्[16] ॥४३८॥

इन्द्रस्थानाच्च सरसस्तथा पर्वतमस्तकात्।
एतैः संस्नाप्य देवेशं[17] दद्याद् गोरोचनां शुभाम्[18] ॥४३९॥

---

1. माषाचर्णं A, माषचूर्णः CG
2. अतः CG
3. मसूर चूर्णैः CG
4. तु H
5. आमलकाणुभिः CG
6. रौद्रं A
7. कालीयकं A, कालीयकोथैश्च CG
8. तगरैः CG
9. कर्णकैः CG
10. प्रियुङ्गुश्च H
11. बीजपूरकैः CG
12. सर्वगन्धान् DE, सर्वौषधीसर्वगन्धैः CG
13. सर्वबीजैश्च काञ्चनैः CG
14. Thus DEF, पत्राणि AH
15. दन्तिदन्तोद्धृता CG
16. द्रुतम् E
17. देवं F
18. Thus CDFG, गोरोचनादिकम् A, गोरोचनं शुभं H

Ed. Leiden v.v. 422-426

435-39. Thereafter, should be applied to the image, the unguents, namely the ground seeds of Phaseolus Radiatus (māṣacūrṇam), the ground seeds of Ipomoea Turpethum (masūracūrṇam), (ground) fruits of Emblic Myrobalan (āmalakāni), Symplocos Recemosa (rodhram), Curcuma xanthorrhiza (kāleyakam), powder of Tabernaemontana coronaria (tagaram), the pericarp of a lotus (karṇakam), the white mustard (siddhārthakam), Panicum Italicum (priyaṅgu), fruits of citron (bījapūrakam), all the medicinal herbs, all scents, all seeds, gold, auspicious things as far as these may be available, jewels, Kuśa grass, water, clay dug out by means of elephant's tooth and bull's horn from the bank of a river, cow-pen, ant hill, confluence (of rivers), water-tank, the place of Indra (king), the lake, and the peak of the mountain.

Having given bath to the king of the gods with all these, one should give the auspicious yellow pigment called gorocanā.

ततस्तु[1]कलशा देया यथाशक्ति स्वलंकृताः ।
जातीपल्लवसम्पूर्णाः फलपूर्णास्तु[2] काञ्चनाः ॥४४०॥

440. Then should be given, as far as the means may allow, pitchers made of gold, well decorated and full of the leaves of Jāti flowers and fruits.

पुण्याहवेदशब्देन[3] वीणावेणु[4]रवेण च ।
सूतमागधशब्देन तथा वन्दिस्वनेन च ॥४४१॥

एवं संःनाप्य गोविन्दं स्वनुलिप्तं[5] स्वलङ्कृतम् ।
सुवाससं[6] पूजयेत[7] जातीपुष्पैः सकुड्मलैः ॥४४२॥

1. च CG
2. फलमूलाश्च CG
3. पुण्याहे वेदशब्देन CG, पुण्याहवाचशब्देन ed Leiden
4. वीणीविणु--A
5. स्वानुलिप्तं A
6. सवाससं D
7. पूजयते D

Ed. Leiden v.v. 427-429

441-42. Having bathed Govinda amidst announcements of good day, recitation of Veda, tunes of Vīṇā and Veṇu, the sounds of Sūtas, Māgadhas and Vandīs, that well anointed, well decorated and well-dressed (Govinda) should be worshipped with Jātī flowers along with buds.

धूपं च सरजो[1] देयं दीपं दद्यात् सुशोभनम् ।
ततस्तु[2] पूजयेद् देवं परमान्नैः सुशोभनैः ॥४४३॥

443. Incense should be given along with pollen of flowers and beautiful earthen lamp. Then the god should be worshipped with rice boiled in milk.

सान्नरत्नप्रदानैश्च[3] पूज्या भागवता[4]स्ततः[5] ।
ततोऽग्निहवनं कार्यं विप्राः पूज्यास्त्[6]वनन्तरम् ॥४४४॥

वासोभिर्भूषणै रत्नैर्गोभिरश्वैर्गजैर्धनैः ।
यथाविभवतो विप्र[7] भोक्तव्यं तदनन्तरम् ॥४४५॥

444-45. Then the Bhāgavatas should be honoured with gifts of grains and jewels. Thereafter should be performed fire-sacrifice and after that should be worshipped the Brāhmaṇas, according to one's means, with clothes, ornaments, jewels, cows, horses, elephants and cash-money. One should take meals afterwards.

---

1. Thus CDEF, चागरुजं A
2. च CG
3. Emended from सान्नरत्नप्रधानैश्च A, महारत्नप्रदानैश्च DEF; अन्नैः प्रधानरत्नैश्च
4. Thus C, पूज्यो भागवतः D, पूज्यो भागवतैः E
5. तथा CG
6. तु om. A
7. Thus corrected from रत्नं by H, former reading other MSS.

Ed. Leiden v.v. 430-432

त्रयोदश्यां ततः पूज्या जना ये रङ्गजीविनः ।
मल्लभट्टादयो[1] ब्रह्मन् स्ववित्तस्यानुरूपतः[2] ॥४४६॥

446. On the thirteenth should be honoured, as the means may allow, the persons whose means of livelihood is stage i.e. wrestlers, panegyrists etc.

चतुर्दश्यां न भोक्तव्यं भोक्तव्यं पयसापि[3] वा ।
पञ्चदश्यां ततः[4] पूज्यो देवदेवो जनार्दनः ॥४४७॥

447. On the fourteenth, either nothing should be taken or milk only may be taken and on the fifteenth should be worshipped Janārdana, the god of the gods.

पौर्णमासीं तु सम्प्राप्य[5] न भोक्तव्यं तदा[6] दिवा ।
ततश्चन्द्रोदये प्राप्ते पूजनीयाश्च कृत्तिकाः[7] ॥४४८॥

कार्त्तिकेयस्तथा खड्गो वरुणः सहुताशनः[8] ।
माल्यैर्गन्धैस्तथा धूपैर्भक्ष्यैरुच्चावचैस्तथा ॥४४९॥

परमान्नैः फलैः[9] शाकै[10] र्वह्निसंतर्पणैस्तथा ।
इक्षूणां च विकारैश्च दीपवृक्षैः सुशोभनैः[11] ॥४५०॥

---

1. मल्लमल्लादयो ADF, जल्लमल्लादयो H
2. स्वस्ववित्तानुरूपतः CG
3. मधुना DFF
4. Thus CDEFG, तथा AH
5. ततः प्राप्य D
6. तथा H
7. पूजनीया च कृत्तिका A
8. कार्तिकेय etc. in accusative MSS.
9. Thus DF, तथा ACGH
10. शाखैः corrected from शाकैः A
11. च शोभनैः A

कुल्माषैर्लोपिकाभिश्च[1] द्विजानां परिपूजनैः[2] ॥४५१॥

448-51. On Paurṇamāsī, nothing should be eaten during the day time. After the rising of the moon, Kṛttikās, Kārttikeya, Khaḍga and Varuṇa along with Hutāśana should be worshipped with garlands, scents, incenses, eatables of various kinds like the rice boiled in milk, vegetables, preparations of sugarcane, half ripe barley, cakes of sugar covered with seeds, beautiful trees of lamps and worship of the twice-born.

एवं कृत्वा तदा पूजां मासदत्तं तु दीपकम् ।
गृहाद् बहिस्तु यद्दत्तं[3] पिटके तत्तु कारयेत् ॥४५२॥

अपां समीपे[4] नीत्वा तु सभक्ष्यं तु[5] प्रवाहयेत्[6] ।
तस्य मूलं[7] तु कर्तव्यं ततो वै चन्दनार्चितम्[8] ॥४५३॥

452-53. After performing worship thus, one should put the earthen lamp, which was placed at the outer side of the house for a month, in a basket and taking in the vicinity of water, make that flow along with some eatables. The bottom of the lamp should be painted with sandlewood.

---

1. लेपिकाभिश्च CG
2. द्विजांश्च परिपूजयेत् CG
3. Thus H यच्च दत्तं A, बहिर्गृहात्तु यद्दत्तं CG
4. समीपं EFG
5. तत्र CG
6. वाहयेत् CG
7. मूले ACG
8. चन्दनार्चनम् CG

क्षीरेण पूर्णं तं कृत्वा मत्स्यं तु सिकतामयम्[1] ।
मुक्तानेत्रं न्यसेत्तस्मिंस्तंच[2] विप्रे निवेदयेत्[3] ॥४५४॥

454. Having made a fish of sand, one should fill it with milk, provide it with eyes of jewels, and then give it to a Brāhmaṇa.

बलीवर्दं[4] ततो देयं[5] श्वेतं शक्त्या विशेषतः[6] ।
सर्वसस्यधरं रम्यं सर्वगन्धसमन्वितम् ॥४५५॥

सवाससं द्विजे दद्यात् कान्तारे सोपतिष्ठति[7] ।
याम्यं मार्गं हि कान्तारं[8] तेन यान्ति विपश्चितः । ४५६॥

455-56. Then a nice white bull—clothed, endowed with all scents and bearing all sorts of grains should be given to a twice-born according to one's means. He waits (for the donor) in the Kāntāra i.e. the path of the god of Death. By means of that (bull) the wise men, verily, cross the way of the god of Death.

यावन्ति रोमकूपानि तस्य दान्तस्य काश्यप[9] ।
तावद् वर्षसहस्राणि स्वर्गे मोदन्ति तत्प्रदाः ॥४५७॥

457. The givers of the bull enjoy themselves in the heaven, for as many years as there are hair on the body of the bull.

---

1. कुर्यान्मत्स्यं च सैकतम् CG
2. मुक्तानेत्रं तु न्यसेत H, मुक्तानेत्रं न्यसेत्तस्य A
3. न्यवेदयेत AFH
4. बलीबर्दं A, वलीवर्दं CGH
5. दद्याच् CGH
6. om. H
7. सोऽपि तिष्ठति E, सोऽवतिष्ठति CG
8. कान्तारे A
9. कश्यप A

पूजयित्वा ततो विष्णुं रक्तमाल्यादिभिः स्वयम् ।
1129-32. Śakra said : "Salutation to you, O lord of the gods, encompassing the three worlds with magical power! The sacrificer, the earth, the sky, the water, the fire, the moon, the sun and the wind are stated to be your bodies which pervade the three worlds. O preceptor of the world, after assuming the Brāhmī form which is rājasī, you create the

1. उवाच add. CG
2. जयमानो BDE
3. तोयाग्नीन्द्रार्कवायवः Ed. Leiden.
4. व्यासं A
5. समास्थाय G
6. This Pāda om. A
7. सृजति B
8. तच्च BDEF
9. First three Pādas of this verse om. A
10. सात्विकत्वे A
11. अखिल Ed. Leiden

worlds (but) you are not created, O soul of the beings! O Maheśvara, you—standing (apart) like a witness—sustain the three worlds and O god, after assuming Kāla form which is tāmasī, you destroy the world.

वृषरूपधरो धर्मो वाहनत्वमुपागतः[1] ।
वामार्धं दयिताकायं[2] ब्रह्मचारी सदा[3] भवान् ॥११३३॥

1133. Dharma—assuming the form of a bull—serves as (your) mount. You are always celibate though left-half of your body is female.

नमः शशांकलेखांकजटाभार[4] महेश्वर ।
गंगातरंगनिधूँतजटाभार नमोऽस्तु ते ॥११३४॥

1134. The mass of your matted hair is marked with the lunar crescent and stirred by the waves of Gaṅgā. O Maheś-vara, salutation to you!

त्रिपुरारे नमस्तेऽस्तु नमस्त्वन्धकघातिने[5] ।
शूलाग्रभिन्नदैत्यांशरुधिरार्द्र[6] नमोऽस्तु ते ॥११३५॥

1135. Salutation to you, O enemy of Tripura and destroyer of Andhaka! Salutation to you who became immersed in the blood of the demon Aṃśa rent asunder with the front part of the spear!

कपालमालिने तुभ्यं पार्वतीदयिताय च ।
उग्रायुधाय भीमाय भीमायुधधराय च ॥११३६॥

---

1. तवागतः H
2. Thus AEH,—कार्यं Ed. Leiden
3. यदा BDEF
4. जगद्योने A
5. —शातिने A
6. कुशाग्र—G

Ed. Leiden v. v. 1090-1093

1136. (Salutation to you) O Pārvatī's lover, wearing a garland of skulls, possessing powerful weapons, terrifying one and holding dreadful arms.

ऊर्ध्वलिङ्गाय शीघ्राय क्रथाय क्रथनाय[1] च ।
मंगल्याय वरेण्याय महाहंसाय[2] मीढुषे ॥११३७॥

भीमाक्षाय[3] भुसुण्डाय व्यालयज्ञोपवीतिने ॥११३८॥

1137-38. (Salutation to you) O Urdhvaliṅga, Śīghra, Kratha, Krathana, auspicious, excellent, bountiful, the Great Swan, possessed of a terrifying eye, Bhusuṇḍa, wearing a serpent as the sacred thread.

क्षमस्व मम देवेश यन् मयासि न पूजितः ।
तवैव मायया पूर्वं मोहितेन जगत्प्रभो ॥११३९॥

1139. Forgive me, O chief of the gods and lord of the world, as it was due to being overwhelmed at first by your magical power that I did not worship you.

प्रसन्नोऽसि ध्रुवं शम्भो येन ज्ञातोऽसि वै मया ।
सुप्रसादो[4]ऽसि देवेश प्रणतोऽस्मि महेश्वर ॥११४०॥

1140. O Śambhu, you are pleased indeed, as you have been recognised by me. O lord of the gods, you are possessed of good favour. O Maheśvara, I am prostrated before you.

---

1. क्रस्यनाय A
2. महाकामाय B, महाहासाय CEF
3. भीमाख्याय H
4. सुप्रसन्नोसि G

बृहदश्व:[1]

एवं स्तुतस्तु[2] शक्रेण ब्रह्मणा ऋषिभिः सुरैः ।
हंसरूपं तदा त्यक्त्वा स्वेन रूपेण शङ्करः ॥११४१॥

जगाम ब्रह्मणो यज्ञं देवानां दर्शनं[3] ददौ[4] ।
आनाययामास तदा देवीं देवो[5] वृषं तथा[6] ॥११४२॥

1141-42. Bṛhadaśva (said) : "Praised thus by Indra, Brahmā, sages and gods, Śaṅkara gave up the form of a swan and having assumed his own form, went to the sacrifice of Brahmā and appeared before the gods. Thereafter, the God brought the goddess and also the bull.

तत्रैव[7] देवदेवेशः समाप्ते ब्रह्मणः क्रतौ ।
सर्वैर्देवगणैः[8] साकं[9] ययौ कालोदकं सरः[10] ॥११४३॥

1143. At the completion of the sacrifice of Brahmā, lord of the gods of the gods went to Kālodaka lake along with the hosts of the gods.

ददर्श नन्दिनं तत्र शीतक्षुद्भावकर्षितम्[11] ।
मृत्युनान्वीयमानेन[12] बन्धुनेव नराधिप ॥११४४॥

---

1. उवाच add. C
2. स A, च F
3. हि वरं B
4. ययौ A
5. देवदेवो G
6. तदा AG
7. इत्थं स G
8. सर्वदेवगणैः BEF
9. Thus A, सार्धं other MSS.
10. हरः H
11. शीततृट्क्षुत्समाकुलम् G
12. मृत्युना नीयमानं च CF

Ed. Leiden v. v. 1097-1100

1144. There, he saw Nandī, weakened due to hunger and cold and followed by death, as if by a relative.

दृष्ट्वोवाच महादेवो नन्दिनं जपतां[1] वरम् ।
वरं वरय भद्रं ते उत्तिष्ठोत्तिष्ठ पुत्रक ॥११४५॥

1145. Seeing Nandī—the best amongst the reciters of the god's name—Mahādeva exclaimed, "O child, rise up, rise up. Ask for a boon as pleases you!"

दृष्ट्वा देवं हरं देव्या[2] पार्वत्या सह संस्थितम्[3] ।
सर्वैर्देवगणैः सार्धं तत्याज मरणाद् भयम् ॥११४६॥

1146. Having seen the god Hara standing along with the goddess Pārvatī and accompanied by all the host of the gods, (Nandī) relinquished the fear of death.

शिलां त्यक्त्वा समुत्थाय तोयमध्यात्[4] ससंभ्रमम् ।
पूजयामास देवेशं वाग्भिरद्भिस्तथैव च[5] ।११४७॥

1147. Leaving the rock aside, he stood up excitedly from the midst of waters and worshipped the lord of the gods with (laudatory) speeches and (offerings of) water.

पूजितः शंकरस्तेन[6] प्रहसन् वाक्यमब्रवीत् ।
रुद्रजापेन ते तात तपसा महता तथा[7] ॥११४८॥

परितुष्टोऽस्मि[8] भद्रं ते[9] मत्समीपे निवत्स्यसि ।
अनेनैव शरीरेण नास्ति ते मृत्युतो भयम् ॥११४९॥

---

1. जगतां H
2. महादेव्या BEF
3. तं स्थितम् F
4. तयोर्मध्यात् B
5. प्रसूनकैः G
6. स चापि पूजितः शम्भुः G
7. महता तपसा तथा G
8. परितुष्टोऽसि A
9. ते भद्रं E

1148-49. Worshipped by him, Śaṅkara said smilingly: "Dear child, I am satisfied with your recital (of the name) of Rudra and your penance. You shall dwell near me, as pleases you, with this very body. There is no fear to you from death.

स्मरस्व[1] पूर्वकं जन्म प्रतीहारो भवान् मम ।
शिलादेन द्विजेन्द्रेण प्राप्तः त्वं तपसा ततः[2] ॥११५०॥

1150. Remember your previous birth when you were my door-keeper. After that, Śilāda—the chief of the twiceborns—obtained you through penance.

तत्पुत्रेण[3] त्वया पुत्र[4] शिलादस्तारितस्तथा[5] ।
गणेश्वरत्वमासाद्य मया सह निवत्स्यसे ॥११५१॥

अस्माद् योजनमात्रेण पूर्वे भागे[6] गणो मम ।
त्वया सार्धं निवत्स्यामि भूत्वा भूतेश्वरो हरः[7] ॥११५२॥

1151-52. O son, by you as a son, Śilāda has been carried across (the world). Having obtained predominance among the gaṇas, you shall live in my company in a place at a distance of one yojana from here towards the east. O best of the gaṇas, I, in the form of Hara Bhūteśvara, shall dwell in your company.

तव नन्दिन्[8] प्रतिष्ठानं वसिष्ठो भगवानृषिः ।
कर्ता देशे शुभे तस्मिन् मम चाप्युत[9] भूतले ॥११५३॥

---

1. स्मरसि BEF
2. तदा CDEH, सदा B
3. सत्पुत्रेण EFGH, मत्पुत्रेण B
4. तात B
5. तदा BE, त्वया A
6. पूर्वभागे AE
7. भूतेश्वराख्यया G
8. तावन्नन्दि—BDE
9. स सदाच्युत BD, मम वाच्युत A

Ed. Leiden v. v. 1106-1109

1153. O Nandī, the gifted sage Vasiṣṭha on the earth shall erect your image and also mine at that holy place.

संनिधानं करिष्याम[1]स्तत्र नित्यं वयं द्विज[2]
पूर्वोत्पन्नः[3] स ज्येष्ठेश[4]स्तत्र लिङ्गो[5] मम द्विज ॥११५४॥

तत्रापि संनिधानं मे नित्यं विज्ञातुमर्हसि ।
ऋषिकोटिसहस्राणि मद्भक्त्या[6] वा द्विजोत्तम ॥११५५॥

तत्र संस्नापयन्ति स्म ज्येष्ठेशं ते सदैव तु[7] ।
ब्रह्मन् दिव्येन तोयेन शुभेनोत्तरमानसात् ॥११५६॥

तेषां तपः प्रभावेन भक्त्या[8] च[9] मम पार्षद ।
सोदरस्य च[10] नागस्य स्थान[11]मुत्तरमानसः[12] ॥११५७॥

स्वयं[13] प्राप्तो महाभाग[14] तत्र रंस्यसि नित्यशः[15] ।
यस्माद्दे[16]शात्तथा याति दक्षिणेन महानदी ॥११५८॥

---

1. करिष्यामि A, om. F
2. द्विजो वयम् A, om. F
3. पूर्वोत्पन्नं G
4. ज्येष्ठेशाख्यं G
5. लिङ्गं G
6. मम भक्त्या DEH, समभक्त्या C
7. च A
8. शक्त्या B
9. Om. A
10. तु E.
11. स्नानम् GH
12. कृत्वा विधानतः G
13. सुखं G
14. यथाभाग A
15. नित्यदा BCE, सर्वदा H
16. तस्मात् G

Ed. Leiden v. v. 1110-1114

हिरण्यिनी[1] पुण्यजला नाम्ना कनकवाहिनी ।
ज्येष्ठेशे वसते[2] भूतैर्वस प्राकाम्यतो द्विज ॥११५९॥

1154-59. We shall always be present there, O twice-born! My liṅga called Jyeṣṭheśa, originated formerly, is there. O twice-born, you should know my continuous presence at that place also. O best among the twice-borns, devoted to me, thousands and crores of sages used to bathe that liṅga (called) Jyeṣṭheśa with the holy and celestial water (brought) from Uttaramānasa. O Pārṣada, due to the influence of their penance and devotion towards me, you yourself shall reach Uttaramānasa—the abode of Sodara Nāga—and live continuously at that place to the south of which flows the great river Hiraṇyinī, possessed of holy water and known as Kanakavāhinī. The Bhūtas dwell at Jyeṣṭheśa. O twice-born, live (there) at your will.

मत्समीपमथाभ्येहि देहेनान्येन पुत्रक ।
एवमुक्त्वा तु देवेशो नन्दिनं प्रणतं[3] स्थितम् ॥११६०॥

मृत्युं विसर्जयामास सान्त्वयित्वा सुरारिहा ।
नन्दिनं च[4] समादाय दृष्ट्वा चोत्तरमानसम् ॥११६१॥

तस्यैव सरसोभ्याशे शृङ्गं त्रैलोक्यविश्रुतम् ।
हरमुकुटमितिख्यातमारुरोह मुदान्वितः ॥११६२॥

1160-62. Then, approach me with another body, O son!" Having spoken thus to Nandī who lay prostrated, the lord of the gods—destroyer of the enemies of the enemies of

1. हिरण्यानी E
2. वसत्वं E
3. —तः G
4. स AG

Ed. Leiden v. v. 1115-1118

the gods—sent away death after consoling him. Taking Nandī along with him, He saw Uttaramānasa and happily climbed up the peak called Haramukuṭa, famous in the three worlds, in the vicinity of that very lake.

तत्र[1] संनिहितो नित्यं देवदेवो महेश्वरः ।
ज्येष्ठेश्वरसमीपे तु वसिष्ठोऽपि महायशाः ॥११६३॥

सर्वैर्देवगणैः सार्धं चक्रे[2] भूतेश्वरं हरम् ।
तस्यैव पश्चिमां[3] मूर्त्तिं स चकाराथ नन्दिनम् ॥११६४॥

1163-64. Maheśvara, the god of the gods is always present there. The high-famed Vasiṣṭha also, along with all the hosts of the gods, erected (the image of) Hara—the lord of the Bhūtas. To the west of that, he erected the image of Nandī.

एवं कृते ययुर्देवा यथागतमरिन्दम ।
सस्रु[4]स्तीर्थानि च तथा ऋषयश्च तपोधनाः ॥११६५॥

1165. O controller of the enemies, having done this, the gods went whence they had come and so also the sages whose wealth is penance. The sacred waters also flowed.

एवं हि भृगुशापेन हरस्यानुग्रहेण च ।
तत्र संनिहितो नन्दी तत्प्रीत्या च महेश्वरः ॥११६६॥

1166. Thus, due to the curse of Bhṛgu and due to the favour of Hara, Nandī is always present there and for his pleasure (is present) Maheśvara too.

नन्दीश्वरस्य या मूर्तिर्दुराचारै[5]र्न दृश्यते ।
भूतेश्वरं तथा दृष्ट्वा मुच्यते सर्वकिल्बिषैः ॥११६७॥

1. यत्र G
2. दध्रे G
3. पञ्चमां B
4. चक्रुः A
5. सुराचारः E

1167. The image of Nandīśvara cannot be seen by the evil-doers. By seeing Bhūteśvara, one is freed from all the sins.

स्नात्वा च[1] सोदरे पुण्ये दृष्ट्वा भूतेश्वरं हरम् ।
ज्येष्ठेश्वरं नन्दिनं च गाणपत्यमवाप्नुयात्[3] ॥११६८॥

1168. By seeing Hara Bhūteśvara, Jyeṣṭheśvara and Nandī after taking bath in the holy Sodara, one may obtain prominence amongst the gaṇas."

गोनन्दः

कपटेश्वरमित्युक्तं[4] देवदेवस्य शूलिनः ।
पुण्यमायतनं तस्य समुत्पत्तिं वदस्व मे ॥११६९॥

1169. Gonanda (said) : "There is the holy abode of Śūlī—the god of the gods—which goes by the name Kapaṭeśvara. Tell me the origin of that.

संशयो[5] मे महान् ब्रह्मन् कपटेश्वरकीर्तनात् ।
किमर्थं भगवान् शम्भुः प्रोच्यते[6] कपटेश्वरः ॥११७०॥

1170. I am put in great doubt due to the name Kapaṭeśvara, O Brahman, why is the venerable Śambhu called Kapaṭeśvara ?"

---

1. Thus A, तु other MSS.
2. गणपत्यम् E
3. इति नीलमते भूतेश्वरमाहात्म्यम् add. BDEF, इति श्रीनीलमते भूतेश्वरमाहात्म्यम् A, इति श्री —CH, इति श्री नीलमतेसोदरतीर्थभूतेश्वरमाहात्म्यम् A, इति श्री नीलमते भरतगिरिमुण्डपृष्ठकृपाणीतीर्थब्रह्मसरोहंसद्वारवाप्पबिन्दुक पिलातीर्थकालोदकवसिष्ठाश्रमज्येष्ठश्वरसोदरोत्तरमानसभूतेश्वरवर्णनं नन्दिचरितं च समाप्तम् G
4. Thus ABFGH,—इत्युक्ते DE
5. संशयं H
6. उच्यते A

Ed. Leiden v. v. 1124-1126

बृहदश्वः

पुण्ये दृषद्वतीतीरे[1] कुरुक्षेत्रे नराधिप ।
ऋषिकोट्यः समुत्तस्थुः तपः परममास्थितः ॥११७१॥

द्रष्टुं देवेश्वरं रुद्रं तद्भक्त्या परमेश्वरः[2] ।
तानाह भगवान् स्वप्ने कश्मीरां द्रुतमाशुगाः ॥११७२॥

व्रजध्वं यत्र नागस्य भवनं विमलं[3] महत् ।
कपटे तत्र दास्यामि दर्शनं भवता[4]महम्[5] ॥११७३॥

1171-73. Bṛhadaśva (replied) : "O king, on the sacred bank of Dṛṣadvatī in Kurukṣetra, there stood in great penance, crores of sages to have a sight of Rudra—the lord of the gods. Due to their devotion the venerable highest lord told them in dream : "O quick-going ones, go soon to Kaśmīrā where there is a spacious and immaculate abode of the Nāga. There, I shall be visible in disguise."

एतत् स्वप्नं निशम्याथ कल्यमु[6]क्त्वा परस्परम् ।
कश्मीरां सहिता जग्मुः शम्भुं देवं दिदृक्षवः ॥११७४॥

1174 Having heard this in dream, they told one another (about it) early in the morning and desirous of seeing god Śambhu, all of them went together to Kaśmīrā.

---

1. तीर्थे E
2. Thus BCDEF, परमेश्वर H, परमेश्वरम् A, महेशानमुमापतिम् G.
3. निर्मलं H
4. महतां A
5. महत् AH
6. Thus ABDG, काल्यम् H

Ed. Leiden v. v. 1127-1130

ते प्राप्य तस्य नागस्य भवनं[1] जलमण्वपि ।
न पश्यन्ति जले[2] काष्ठैः सर्वतः परिवारिते[3] ॥११७५॥

1175. Having reached that abode of the Nāga, they could not see even a little water, for the water was all over covered with pieces of wood.

तत्र[4] काष्ठानि संचाल्य करैस्ते ऋषिसत्तमाः ।
स्नातमात्रा ययुः सर्वे[5] स्वशरीरेण रुद्रताम् ॥११७६॥

1176. Moving the wooden logs with their hands, the best sages obtained Rudrahood with their bodies by merely taking bath (therein).

वासिष्ठो ब्राह्मणस्त्वेको नाम्ना गौरपराशरः ।
न सस्नौ न च तत् काष्ठं पस्पर्श च[6] कुतूहलात्[7] ॥११७७॥

तत्रस्थः शोषयामास निराहारः कलेवरम् ।
तमुवाच हरः स्वप्ने किमर्थं द्विज क्लिश्यसि ॥११७८॥

1177-78. There was one Vāsiṣṭha Brāhmaṇa named Gauraparāśara who did not take bath and did not, even out of curiosity, touch the wooden log. Staying there, he made his body decay through fasting. Hara spoke to him in dream : "Why are you suffering, O twice-born ?"

स्नात्वा संस्पृश्य काष्ठानि शीघ्रं त्वं व्रज रुद्रताम्[8] ॥११७९॥

---

1. भवने BG
2. जलं BE
3. परिवारितैः A
4. इति G
5. स्वप्ने H
6. Thus CE, पस्पर्शाथ B, पस्पर्शाति—F
7. vv 1177 to 1179 om. AH
8. After this occurs a hemistich in Ed. Leiden इत्युक्तो ऽसौ तदा स्वप्ने शम्भुना परमेष्ठिना
Ed. Leidn v. v. 1131-1135

तमुवाच द्विजो[1]रुद्रं प्रयतः प्राञ्जलिः स्थितः ।
सत्यं रुद्रत्वमासाद्य दृश्यसे त्वं जगद्गुरो ॥११८०॥

किन्त्वदृष्टे हि देवेशे नास्ति मे मनसो धृतिः ।
कपटे भवने[2] दास्ये त्वयोक्तं[3] दर्शनं प्रभो ॥११८१॥

1179-81 "Obtain Rudrahood quickly by taking bath and touching the wooden logs !" The twice-born stood in submission and with folded hands, spoke to Rudra : "That you can be visible after the attainment of Rudrahood is a fact, O father of the world ! But my mind is not satisfied without the sight of the lord of the gods. You had said that you would be visible in disguise in the abode (of the Nāga).

तदप्राप्य न यास्यामि न च भोक्ष्यामि शंकर ।
तमुवाच ततो भूयः शंकरः प्रहसन्निव[4] ॥११८२॥

दत्तं तु काष्ठरूपेण मया तेषां तु[5] दर्शनम् ।
ते मां[6] दृष्ट्वैव संप्राप्ता रुद्रत्वं तत्[7] तथा द्विज[8] ॥११८३॥

तवाधिकेन तपसा वरं दद्मि यथेप्सितम्[9] ।
तत् त्वं वरय भद्रं ते रुद्रतां च तथा व्रज ॥११८४॥

---

1. हरो E
2. भुवने A
3. उक्तं om. A
4. प्रहसन्निव शंकरः G
5. हि G
6. तेषां AH
7. तु BDF
8. द्विजोत्तम B
9. तवेप्सितम् H, तथेप्सितम् C

1182-84. Without getting that (sight), O Śaṅkara, I would neither go nor eat (anything)." Smiling a bit, Śaṅkara said to him again : "I have already provided to them, my manifestation in the form of wooden log. Merely by seeing me, they attained Rudrahood, O twice-born ! Now, due to your penance which is greater, I give you the desired boon. Ask for what you desire and obtain Rudrahood."

गौरपराशरः[1]

वरश्[2]चेद् दीयते देव मम कामाङ्गनाशन ।
ऋषिभिस्त्वं यथा दृष्टः काष्ठरूपी[3] महेश्वर ॥११८५॥

तथा त्वं देहि सर्वस्य जनस्येह निदर्शनम् ।
सर्वकालं जगन्नाथ लोकः क्लिश्यति[4] पाप्मना ॥११८६॥

1185-86. Gauraparāśara (spoke) : "O god, destroyer of the body of Kāma, O Maheśvara, if you are to give me a boon, then manifest yourself in the form of a wooden log, to all the human beings, as you did to the sages. O lord of the world, the world is suffering perpetually due to sin."

महेश्वरः

द्रक्ष्यन्ति ये जनाः सर्वे[5] काष्ठरूपं समास्थितम्[6]
कदाचिद् द्विजशार्दूल सर्वकालं तु नो द्विज ॥११८७॥

1187. Maheśvara said : "O best among the twice-borns,

---

1. उवाच add CE vv. 1185 to 1266 om. D
2. वरं E
3. काष्ठरूपे BF
4. लोकाः क्लिश्यन्ति B
5. नाम G
6. काष्ठरूपसमास्थितम् BF

Ed. Leiden v. v. 1141-1143

all those people who will see (the god) standing in the form of wood, (will see the god) not always but only occasionally.

अयं च सततं नन्दी काष्ठरूपी गणो मम ।
दर्शनं दास्यते नृणां[1] तदनुग्रहकाम्यया ॥११८८॥

1188, With a desire to do favour to them, my gaṇa—this Nandī in the form of wooden log—shall always be visible to the human beings.

तेन[2] दृष्ट्वा च[3] यास्यन्ति स्वशरीरेण रुद्रताम् ।
कपटेन च दास्यामि नराणां दर्शनं यदा ॥११८९॥

तदा संज्ञामवाप्स्यामि कपटेश्वर इत्युत ।
तोयस्य बहुलीभावो[4] देशेऽस्मिन् ब्राह्मणोत्तम ॥११९०॥

1189-90. And having seen (him) they would attain Rudrahood with their bodies. As I shall appear in disguise before men, so I shall obtain the name, Kapaṭeśvara. O best among the Brāhmaṇas, there is plenty of water in this country.

दर्शनस्य मदीयस्य[5] पूर्वरूपं भविष्यति ।
इत्येतत् कथितं तुभ्यं कपटेश्वरसम्भवम्[6] ॥११९१॥

1191. My manifestation will be in the previous form." Thus has been related to you, the origin of Kapaṭeśvara.

---

1. नूनं A
2. मां च CEFG, तं च H
3. न CEFGH
4. बहुलीभावे H
5. मदीनस्य EF
6. कपटेश्वरसमुद्भवम् B, कपटेश्वरसंगतम् G, कमटेश्वरसम्भवः C इति नीलमते कपटेश्वरसम्भवम् add, H

Ed. Leiden v. v. 1144-1147

गोनन्दः[1] ।

भगवन् श्रोतुमिच्छामि विष्णोरायतनान्यहम् ।
कश्मीरायां[2] फलं तेषां येषां[3] सन्निहितो हरिः[4] ॥११९२॥

1192. Gonanda (spoke) : "O venerable one ! I have a desire to hear about Viṣṇu's abodes in Kaśmīrā, and also the merit of those (places) where Hari is present."

बृहदश्वः[5] ।

नित्यं सन्निहितो देवो राजंश्चक्रधरो हरिः ।
तं दृष्ट्वा पुण्डरीकाक्षं दशधेनुफलं लभेत्[6] ॥११९३॥

1193. Bṛhadaśva (said) : "O king, the god is always present (in the form of) discus-wielder Hari. Having seen him who has lotus-like eyes, one obtains the merit of (giving) ten cows.

नित्यं सन्निहितो देवो नरसिंहो जनार्दनः ।
तं दृष्ट्वा देवदेवेशमश्वमेधफलं लभेत्[7] ॥११९४॥

1194. God Janārdana is always present (in the from of) Narasiṃha. Seeing him—the lord of the gods of the gods—one obtains the merit of (performing) Horse—sacrifice.

देवः सन्निहितो राजन् नित्यं बहुसरस्तथा[8] ।
स तु[9] सन्निहितो राजन् पुण्ये देवसरे[10] शुभे ॥११९५॥

---

1. उवाच add. C
2. कश्मीरेषु G
3. यत्र A
4. येषां सन्निधानाद्धरेःपरम् G
5. उवाच add. CE
6. भवेत् GH, This verse om. B, last Pāda of this verse and first three Pādas of next verse om. A
7. अश्वमेधफलोदयः G
8. बहुपूरे स तु C
9. तथा C H
10. Thus BF, देवसुरेश्वर H, देवसरः other MSS. Ed. Leiden v. v. 1148-1151

1195. O King, the god Bahusara is always present in the holy and auspicious Devasara.

वासिष्ठायामथैवात्र कद्र्वार्चायां तथैव च ।
विनतार्चायां[1] सन्निहितो[2] गौतम्यां पार्थिवोत्तम ॥११९६॥

एता[3] दृष्ट्वा केशवार्चा[4] अग्निष्टोमफलं[5] लभेत् ॥११९७॥

1196. O best among the kings, (the god lives) in the images erected by Vasiṣṭha, Kadrū, Vinatā, and Gautama. By seeing these images of Keśava, one obtains the merit (of the performance) of Agniṣṭoma.

महापद्मस्य सरसः पुण्ये कूले तथोत्तरे ।
नृसिंहमपरं दृष्ट्वा ह्यग्निष्टोमफलं[6] लभेत् ॥११९८॥

1198. By the sight of another Nṛsiṃha on the holy northern bank of Mahāpadma lake, one obtains the merit of (performing) Agniṣṭoma.

देवं शक्रकृतं[7] दृष्ट्वा वरुणेन तथा कृतम् ।
ब्रह्मणा च धनेशेन यमेन च हरेण च ॥११९९॥

दिवाकरेण सोमेन वह्निना पवनेन च ।
कश्यपेनाथ भृगुणा पुलस्त्येन[8] तथात्रिणा ॥१२००॥

1. विनतायां BEF, वैनतायां C.
2. सन्निहितं H
3. एतां FH
4. केशवार्चां FH
5. त्वग्निष्टोमफलं G
6. ज्योतिष्टोमफलं G, This verse om. AC
7. देवेशं चक्रं तं B
8. पुलम्बेन BE

भूर्जस्वामिं[1] महास्वामिं शतभृङ्ग[2]गदाधरम्[3] ।
मेरोर्भवनपार्श्वे[4] च भृगुस्वामिं जनार्दनम् ॥१२०१॥

तैत्तिरीयेश्वरं देवं दण्डकस्वामिनं[5] तथा ।
भवस्य च तथा पार्श्वे रामस्वामिं जनार्दनम् ॥१२०२॥

देवं नारायणं स्थानं[6] पश्चिमे तु वरप्रदम् ।
गजेन्द्रमोक्षणं देवं वराहस्य[7] समीपगम्[8] ॥१२०३॥

वराहं[9] च नृसिंहं च बहुरूपं वरप्रदम् ।
सप्तर्षीणां तथैवार्चाः सुमुखस्य समीपगाः[10] ॥१२०४॥

तुङ्गवासं[11] च वरदं वरदं च स्वयम्भुवम् ।
गुहावासं च[12] योगीश[13]मनन्तं कपिलं मुनिम्[14] ॥१२०५॥
अश्वशीर्षं तथा मत्स्यं हंसं कूर्मं तथैव च ।
उतङ्कस्वामिनं[15] देवं वालखिल्यकृतं तथा ॥१२०६॥

---

1. भूत्वा स्वामिं BE, भूतस्वामि G
2. शतशृङ्गं B
3. गदाधरान् G
4. मनोर्भवनपार्श्वे BC
5. This verse om. E, वरेकस्वामिनं BC, वेरकस्वामिनं F देनुकस्वामिनं A, देवका—G
6. नारायणस्थाने CG
7. वाराहस्य B
8. This hemistich om. A
9. वाराहं G
10. This hemistich om. A
11. तुङ्गोवासं BEF
12. स G
13. Thus A, योगेशम् other MSS.
14. कपिलेश्वरम् C
15. ततुङ्कस्वामिनं C

Ed. Leiden v. v. 1156-1161

गरुडं[1] जलवासं च देवं भोगमयं तथा ।
दृष्ट्वैवकैकमथैतेभ्यो दशधेनुफलं लभेत ॥१२०७॥

1199-1207. By seeing (the images of) the god erected by Śakra, Varuṇa, Brahmā, Dhaneśa, Yama, Hara, Divākara, Soma, Vahni, Pavana, Kaśyapa, Bhṛgu, Pulastya and Atri, and by seeing anyone of these, namely, Bhūrjasvāmī, Mahāsvāmī Śataśṛṅga, Gadādhara Janārdana-Bhṛgusvāmī near the abode of Meru, the god Taittirīyeśvara, the god Daṇḍakasvāmī, Janārdana-Rāmasvāmī near Bhava, the boon-giver god Nārāyaṇasthāna towards west, the god Gajendra-mokṣaṇa near Varāha, Varāha, Nṛsiṃha, the boon-giver Bahurūpa, the images of seven sages near Sumukha, the boon-giver Tuṅgavāsa, the boon-giver Svayambhū, Guhāvāsa, Yogīśa, Ananta, the sage Kapila, Aśvaśīrṣa, Matsya, Haṃsa, Kūrma, Uttaṅkasvāmī, the god erected by Vālakhilyas, Garuḍa, Jalavāsa and the god possessed of hoods, one gets the merit of (the gift of) ten cows.

वैन्येन पृथुना पूर्वं मगधेषु प्रतिष्ठितम् ।
दृष्ट्वैवाप्नोति च[2] फलं पुण्डरीकस्य[3] मानवः ॥१२०८॥

1208. Seeing the image erected formerly in Magadha by Pṛthu—the son of Vena—a man obtains the merit of (performing) Puṇḍarīka.

गृध्रकूटे[4] तथैवार्चां तथा[5] भृगुकृतां शुभाम्[6] ।
आश्रमस्वामि इत्युक्तां[7] पर्वतादवतारिताम् ॥१२०९॥

---

1. गारुडं C
2. Thus A, हि other MSS.
3. पौंडरीकस्य F
4. गृद्धयुद्धे BEF
5. शुभां E
6. तथा EF
7. Thus H, आश्रमस्वामिनोक्तां G, आश्रमस्वामिनाम्नोत्थां C, आश्रमस्वामिनोभ्युक्तां BE, आश्रमस्वामिनेत्युक्तां F. आश्रमस्वामिन उक्तां A

स्वदेशपार्श्वे रामेण भार्गवेण महात्मना ।
दृष्ट्वैव[1] सर्वपापेभ्यो मुच्यते नात्र संशयः ॥१२१०॥

1209-10. And by seeing the auspicious image called Āśramasvāmi, erected by Bhṛgu on Gṛdhrakūṭa and brought down from the hill to the vicinity of his place, by the high-minded Rāma—the son of Bhṛgu—one is freed from all sins. There is no doubt herein.

गोनन्दः[2]

गृध्रकूटाद् गिरिश्रेष्ठात् किमर्थं भृगुनिर्मिता।
अर्चावतारिता ब्रह्मन् स्वाश्रमस्य समीपतः ॥१२११॥

1211. Gonanda (asked): "Why was the image constructed by Bhṛgu, brought down from Gṛdhrakūṭa—the best of the mountains—to the vicinity of his own hermitage ?"

बृहदश्वः

पुरा पितृवधादर्चां रामः क्षत्रियमर्दनः[3]।
त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां पुरा[4] ॥१२१२॥

1212. On account of the murder of his father (committed by Haihaya Kṣatriyas), Rāma—the oppressor of the Kṣatriyas—made the earth devoid of Kṣatriyas for twenty-one times.

एकविंशतिमे[5] घाते प्राप्ते केचित्तु क्षत्रियाः ।
गिरिदुर्ग[6]मनुप्राप्ताः कश्मीरायां[7] नृपोत्तम ॥१२१३॥

1213. O best of the kings, at the time of the 21st massacre, some Kṣatriyas reached the hilly fort in Kaśmīrā.

---

1. दृष्टैवं BE
2. उवाच add EF
3. क्षत्रियवर्धनः B
4. तथा AG
5. Thus H, एकविंशत्तमे AC, एकविंशे तथा G
6. शरदुर्गम् E, शिरदुर्गम् F
7. कश्मीरेषु G

Ed. Leiden v. v. 1165-1168

रामोऽनुपदमागत्य[1] ताञ्जघानातिरोषण:[2] ।
तेभ्योऽपि क्षत्रियाः केचिद्धतशेषा[3] महीपते[4] ॥१२१४॥

तद्भयेनागता[5]स्त्यक्त्वा कश्मीरां राजसत्तम ।
नदी मधुमती[6] यत्र तथान्या[7] रजनिर्मला[8] ॥१२१५॥

तथापि[9] रामस्तान् गत्वा[10] पातयामास[11] रोषतः[12] ॥१२१६॥

1214-16. O lord of the earth, being excessively angry, Rāma pursued and killed them. From amongst them also, a few Kṣatriyas escaped death and leaving Kaśmīrā due to his fear, reached where there is the river Madhumatī and the other Rajanirmalā. Even then Rāma overtook them and angrily pulled them down.

निःशेषान् क्षत्रियान् हत्वा[13] रुधिराक्तकर[14]स्तथा[15] ।
प्रतिष्ठामकरोद् राजन् केशवस्य महात्मनः ॥१२१७॥

---

1. Thus A, आगम्य other MSS.
2. अतिरोषितिः A
3. क्षतशेषाः G
4. महीतले B
5. तद्भयान्निर्गताः B
6. मधुमती नदी H
7. तत्रान्या B
8. राजनिर्मला H, राजनिर्मिता BCF, नृपनिर्मल! G
9. तत्रापि G
10. नत्वा A
11. घातयामास BEFH
12. रोषितः A
13. कृत्वा G
14. रुधिराक्तहरः BC
15. ततः H

राजावासमिति प्रोक्तं सर्वलोकेषु[1] विश्रुतम्।
तद् दृष्ट्वा शीघ्रमाप्नोति कार्यसिद्धिं नरोत्तम[2] १२१८॥

1217-18. Having killed all the Kṣatriyas, he, with his hands drenched in blood, erected an image of the high-souled Keśava. (That image) called Rājāvāsa is famous in all the worlds. By seeing that, a king quickly obtains success in his undertakings.

रौद्रभावेन रामेण यदा चार्चा विनिर्मिता।
रौद्रभावमथास्थाय तस्यां[3] सन्निहितो हरिः[4] ॥१२१९॥

1219. As Rāma had erected that image in a mood of violence so Hari is always present there in a fierce mood.

अर्चयन्ति च रौद्रेण तं[5] च भावेन मानवाः।
रौद्रभावान् महीनाथ नित्यं पशुवधादिना ॥१२२०॥

1220. Human beings also worship Him with a feeling of violence and as a result of this feeling (they worship Him) daily with such actions as the killing of animals.

ततो[6] रामोऽपि[7] धर्मात्मा पूर्वं क्षत्रियशोणितैः।
कृत्वा कुण्डाञ्जगामाथ[8] कुरुक्षेत्रं[9] महीपते ॥१२२१॥

1221. O lord of the earth, having excavated, at first,

---

1. राजलोकेषु
2. नरोत्तमः H
3. नित्यं H
4. Thus ACG, हरः other MSS.
5. Thus H, तां ABE
6. तत्र H, इति G
7. स G
8. Thus ABCEH, जगामाशु A
9. कुरुक्षेत्रं F, कुण्डक्षेत्रं B

Ed. Leiden v.v. 1172-1175

pits (filled) with the blood of Kṣatriyas, the pious Rāma also went to Kurukṣetra.

पितॄन् स तेष्वथाभ्यर्च्य मुदं लेभे वरारिहा[1] ।
तमूचुः पितरः प्रीता राम राम महाभुज ॥१२२२॥

कर्मणोऽस्मान् निवर्तस्व[2] तीर्थयात्रां तथा कुरु ।
पलायमानान् भीतांश्च हतवानसि पार्थिवान्[3] ॥१२२३॥

तेन पापेन ते पुत्र[4] शरीरं कल्मषं[5] यदा[6] ।
तस्माद् व्रजस्व तीर्थानि पावनार्थमिहात्मनः ॥१२२४॥

1222-24. That destroyer of the royol enemies obtained pleasure after worshipping the forefathers in those (pits). The pleased forefathers addressed him thus: "O long-armed Rāma, deviate yourself from this act and go on a holy pilgrimage. As you have killed the kings who were frightend and had taken flight, your body has become sinful with that sin. Hence, O son, go to the holy places for purifying yourself.

भविष्यसि यथावत् त्वं शुद्धदेहश्च पुत्रक ।
नापैष्यति[7] हि ते तावत् करेभ्यो[8] रुधिरं दृढम् ॥१२२५॥

यदा[9] करौ विरुधिरौ पुत्र तव भविष्यतः ।
तदा त्वं निर्मलीभूतः तपः कुरु यथासुखम् ॥१२२६॥

1225-26. Till you become possessed of a purified body, O son, the fast sticking blood would not disappear from your

---

1. Thus BEFGH, सुरारिहा AC
2. Thus G, कर्मणोग्रेण निवर्त्य A कर्मणोग्रान् Other MSS.
3. पुत्रक G
4. तत्र E
5. कलुषं EE
6. यदि E, शरीरे कलुषं स्थितम् G
7. न चापैति G
8. कराभ्यां G
9. यथा A

hands. When both your hands become free from blood, then having become purified, you should practise penance as may please you.

एवमुक्तस्तदा[1] रामः पितृभिः पूजितस्ततः ।
चकार तीर्थयात्रां वै सर्वदेशेषु[2] पार्थिव ॥१२२७॥

1227. O king, addressed thus and honoured by the forefathers, Rāma went then, as a pilgrim, to all the holy places.

कृत्वा जगाम कश्मीरां[3] तथा च स[4] महीपते ।
आप्लुत्य[5] तीर्थेषु तदा गृध्रकूटमुपागमत्[6] ॥१२२८॥

1228. Then, he went to Kaśmīra and having bathed in all the holy places, he reached near Gṛdhrakūṭa.

शुद्धा[7] सरस्वती चैव संयोगं यत्र[8] गच्छतः ।
तत्र स्नातस्य रामस्य करौ शुद्धिमुपागतौ ॥१२२९॥

1229. After a bath at the place where the Śuddhā and the Sarasvatī meet, the hands of Rāma became purified.

---

1. तथा A
2. Thus ABEF, सर्वतीर्थेषु H
3. काश्मीरां BE, कश्मीरान् G
4. तथैवासौ G, तथापि स H
5. आप्लाव्य BE
6. Thus H, उपागतम् AF
7. Thus all MSS except A which has नदी
8. तत्र B

Ed. Leiden v. v. 1181-1183

तस्य तीर्थस्य[1] रामोऽपि वरं प्रादान्महायशाः ।
अस्मिन् तीर्थे नरः स्नात्वा सर्वं मोक्ष्यति किल्विषम्[2] ॥१२३०॥

शुद्धदेहस्तदा गन्ता भृगूणां समलोकताम् ।
एवं तु निर्मलीभूतो रामः परबलार्दनः ॥१२३१॥

1230-31 Rāma also gave to that place, a boon, viz. "After taking bath at this holy spot, a man will give up all his sins. With his body purified, he shall attain the same world as is accessible to the Bhṛgus." Thus, was Rāma—the tormentor of the armies of the enemies—purged of sin.

पथेश्वरमथास्थाय[3] तपस्तेपे सुदारुणम् ।
नदीं सम्प्राप्य पुण्योदां तदा ब्रह्मसरोद्भवाम्[4] ॥१२३२॥

1232. He practised hard penance after arriving at Patheśvara and thereafter arrived at the river Puṇyodā which had originated from the Brahmasara.

यदा तस्यां तु रामेण तपस्तप्तं महात्मना ।
तदा रामह्रदेत्येवं नदी सा भुवि विश्रुता ॥१२३३॥

1233. When the high-minded Rāma performed austerities there, the river became famous on the earth, by the name Rāmahradā.

तत्र संवत्सरं कृत्वा रामोऽपि परमं तपः ।
तपोऽर्थं गृध्रकूटस्य तदा मूलं जगाम सः ॥१२३४॥

1234. Having performed austerities there, for a year, Rāma went for penance to the foot of Gṛdhrakūṭa.

---

1. तीर्थं स A
2. किल्बिषम् DE
3. अथास्थाय BC
4. ब्रह्मसरोद्भवम् E

Ed. Leiden v. v. 1184-1188

यत्रास्य चागतौ शुद्धिं करौ पूर्वं महीपते ।
तस्माददूरे पुण्योदामनन्तस्य महात्मनः ॥१२३५॥

भवनं नागराजस्य तपस्तेपे महात्मनः[1] ।
प्रतिष्ठानं तथा चक्रे[2] तस्य देवस्य[3] शार्ङ्गिणः ॥१२३६॥

1235-36, Not far from the place where his hands had attained purity and not far from the Puṇyodā, there is the abode of the high-souled Nāga king Ananta. (Rāma) performed hard penance there and erected the image of the god Śārṅgī.

तत्रासतस्तत[4]स्तस्य रामस्याक्लिष्टकर्मणः[5] ।
आश्रमस्वामिनं द्रष्टुं प्रययौ ब्राह्मणोत्तमः ॥१२३७॥

दातुं गां देवदेवस्य[6] तामादाय तु[7] सत्वरः[8] ।
तत्रासावपथि[9] प्राणांस्तस्मिंस्तत्याज पर्वते ॥१२३८॥

1237-38. While Rāma of unwearied activity was staying there, a good Brāhmaṇa went to see Āśramasvāmī. He took a cow along with him to offer to that god. She breathed her last there on the hard way on that mountain.

---

1. Thus BEFH, प्रतिष्ठितम् A, स तत्र हि G
2. चक्रे तस्य प्रतिष्ठानं तथा A
3. देवदेवस्य G
4. तदा B
5. First two pādas of this verse om. E
6. तस्य देवस्य BCH
7. च A
8. तत्रादृष्ट्वा च तं मुनिम् G. It adds जगाम तं मृगयितुं तामादाय तु सत्वरः
9. अपथे A

त्यक्त्वा च गां[1] महीनाथ[2] ब्राह्मणोऽपि निर्वर्तितः ।
प्रायश्चित्तीयतां प्राप्य दुःखशोकसमन्वितः ॥१२३९॥

1239. O lord of the earth, the Brāhmaṇa also—immersed in repentance—came back with a mind full of grief and sorrow, after leaving the cow.

स रामाश्रममागत्य[3] वासिष्ठो[4] धर्मनिश्चलः ।
यथावृत्तमथाचख्यौ रामाय सुमहात्मने ॥१२४०॥

तमुवाच ततो रामः पश्यन् दिव्येन चक्षुषा ॥१२४१॥

1240-41. Persistent in piety, that Vāsiṣṭha (Brāhmaṇa) went to the hermitage of Rāma and related all that had happened, to the high-souled Rāma. Then Rāma, seeing with his celestial sight, said to him.

दिव्योत्पन्ना द्विजश्रेष्ठ दिव्यनारी[5] मनोरमा ।
देवर्षिं वञ्चयामास गोरूपेणाथ नारदम् ॥१२४२॥

1242. "O best among the twice-borns, this charming celestial woman born in heaven deceived, in the guise of a cow, Nārada—the heavenly sage.

तेन विज्ञाय सा शप्ता तव गोत्वमुपागता[6] ।
तेनैव तस्य शापान्तः कृतो ब्राह्मणसत्तम ॥१२४३॥

गोस्वामिना नीयमाना गृध्रकूटे शिलोच्चये ।
तनुं त्यक्त्वा ततो भूयो भविष्यसि वराप्सराः ॥१२४४॥

1243-44. Having come to know this, he cursed her and she became your cow. Further, he pronounced the end

---

1. गां च G
2. महीपाल G
3. आसाद्य H
4. ब्राह्मणो H
5. देवनारी BEF
6. उपागतम् E

of the curse thus : "While being carried by the cow-owner, to the mountain Gṛdhrakūṭa, you shall give up the body and again turn into a nice fairy.

मोक्षिता सा त्वया शापान्नतेऽस्ति द्विज पातकम् ।
गोदानफलसंयुक्तो मत्प्रसादाद् भविष्यसि ॥१२४५॥

1145. O twice-born, she has been freed from the curse by you, so no sin accrues to you. By my favour you shall be endowed with the merit of the gift of a cow.

गच्छ पश्य स्वदेवेशं तथाश्रमनिवासिनम् ।
तं दृष्ट्वा सर्वपापेभ्यो विनिर्मुक्तो भविष्यसि[1] ॥१२४६॥

1146. Go and see your own lord of the gods living in Āśrama. By his sight you shall be freed from all the sins.

अहं हि देवप्रवरमाराध्य[2] मधुसूदनम् ।
इहानयिष्ये तामर्चां लोकस्य हितकाम्यया[3] ॥१२४७॥

1247 I, too, with a desire to do good to the world, shall bring that image here, by propitiating Madhusūdana—the best among the gods.

प्रायशो[4] धेनुदानेन लोकोऽर्चयति तं हरिम् ।
पर्वतारोहणे[5] क्लेशो महान् विप्र गवां तथा[6] ॥१२४८॥

1248. O Brāhmaṇa, people often worship that Hari with the gift of cow and the cows suffer a lot while climbing up the hill.

---

1. This verse om. EH
2. चाराध्य A.
3. Fourth Pāda om. AH
4. This verse and first pāda of next verse om. AH
5. पर्वतारोहिणी E
6. यथा BEF

Ed Leiden v.s. 1998-1201

आनीतायामिहार्चायां द्विजेन्द्र न[1] भविष्यति।
तस्मिन्नेव तदा स्थाने तपस्तेपे स भार्गवः ॥१२४९॥

1249. O chief among the twice-borns, there would not be (any suffering), when the image is brought here." Then, that descendant of Bhṛgu practised penance at that very place.

ततः संवत्सरस्यान्ते[2] ददर्श मधुसूदनम्।
दिव्येन चक्षुषा राजन् प्रसन्नमग्रतः[3] स्थितम् ॥१२५०॥

तुषारचयसंकाशं श्वेताम्बरविभूषितम्।
मुकुटेनार्कवर्णेन कुण्डलैश्च[4] विराजितम् ॥१२५१॥

चतुर्मुखं चतुर्बाहुं चतुर्वेदाश्रयान्वितम्।
शरीरधारिभिः शस्त्रै[5]रुदीरितजयस्वनम्[6] ॥१२५२॥

तं दृष्ट्वा प्रणतो राजंस्तुष्टाव मधुसूदनम्।

1250-1253a. Then, O king, at the end of the year, he saw with his celestial sight, pleased Madhusūdana, standing in front, resembling a heap of snow (due to being) adorned with white clothes, decorated with a crown of the hue of the sun and with earrings, four-faced, four-armed, accompanied by the abode of the four Vedas, and with cries of victory pronounced by weapons endowed with human bodies. Seeing Madhusūdana, O king, he praised him thus.

---

1. Thus G, द्विजेन्द्रेण other MSS.
2. संवत्सरास्यान्तं CF
3. पुरतः BCEF
4. कुण्डलाभ्यां A
5. Thus C, शास्त्रैर् AH, चास्त्रैर् G, वस्त्रैर् Ed. Leiden
6. Third and fourth Pādas om. E

परशुरामः[1]

नमस्ते देवदेवेश प्रणतार्तिविनाशन ॥१२५३॥

Paraśurāma :

1253. Salutation to you, O lord of the gods of the gods, destroyer of the sufferings of those who prostrate (before you).

चतुर्मूर्ते महामूर्ते चतुर्वेद महाभुज ।
गोविन्द पुण्डरीकाक्ष वराहाद्य नमोस्तु ते ॥१२५४॥

1254 Salutation to you who are possessed of four forms, endowed with a bulky body, abode of four Vedas, long-armed, finder of the cow, (earth), lotus-eyed and having Varāha and other incarnations.

दंष्ट्राग्रोद्धृतभूभाग[2] संचूर्णितशिलोच्चय[3] ।
त्वं सदैव वराहोसि येनेदं धार्यते जगत् ॥१२५५॥

1255. Bearing the earth on the front part of the jaws, crushing the mountains into pieces, you are Varāha by whom this world is held constantly.

करजाग्रविनिर्भिन्नहिरण्यकशिपूरसे[4] ।
नमस्तुभ्यं नृसिंहाय ज्वालामालाकुलात्मने ॥१२५६॥

1256. Salutation to you, O Man-lion—surrounded by garlands of flames—who broke forth the chest of Hiraṇyakaśipu with the tips of nails.

---

1. श्रीराम: B, राम उवाच C, रामः H
2. दंष्ट्राग्रोद्यत—B
3. संशूर्णितशिलोच्चय C, संचलितशिलोच्चय G
4. हिरण्यकशिपोरसे AH, हिरण्यकश्यपूरसे CF

Ed. Leiden v. 1206-1209

त्रिविक्रमाय देवाय नमस्ते विजिगीषवे ।
सोमभूषितवक्त्राय नमोऽश्वशिरसे[1] प्रभो[2] ॥१२५७॥

1257. Salutation to you—the god who took three steps—desirous of victory. Salutation to you, O lord, possessed of the head of a horse and with face embellished with Soma.

त्वं देव[3] सर्वदेवानां दुःखितानां परा गतिः ।
इन्द्रियाणीन्द्रियार्थाश्च महाभूतानि यानि च ॥१२५८॥

मनो बुद्धिस्तथैवात्मा अव्यक्तं[4] पुरुषोद्भवम् ।
सत्त्वं रजस्तमश्चैव ब्रह्मा विष्णुर्महेश्वरः[5] ॥१२५९॥

त्वया सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरम्
त्वया विना न पश्यामि किंचिदेव जगत्त्रये ॥१२६०॥

1258-60. O god, you are the final resort of all the gods when they are in suffering. The senses, the objects of of senses, the gross physical elements, the mind, the intellect, the soul, avyakta born of Puruṣa, sattva, rajas, tamas, Brahmā, Viṣṇu, Maheśvara, the three worlds including movables and immovables, all this is pervaded by you. I do not see anything else than yourself in the three worlds.

त्वत्तेजसा मया[6] देव निहताः क्षत्रिया भुवि ।
कोटिसंख्याश्च निहताः सैंहिकेया महाबलाः ॥१२६१॥

1261. O god, it was through your strength that I killed, on the earth, the Kṣatriyas and one crore highly strong Saiṃhikeyas.

---

1. Thus GH, स्वशिरसे other MSS.
2. विभो G
3. देवः H
4. यत् add G
5. महेश्वराः G
6. यदा GH

सूक्ष्मातिसूक्ष्म देवेश महद्भ्योऽपि[1] महत्तर[2] ।
क्षीरोदकन्यादयित कामरूप नमोस्तु ते ॥१२६२॥

1262. Obeisance to you, O lord of the gods, O minutest among the minute and the greatest among the great, O lover of the daughter of the ocean, O assumer of forms at your own will !

कामकामद कामारिपूजिताघविनाशन ।
चतुर्भिः सततं वक्त्रैः पद्मजन्माभिसंस्तुत[3] ॥१२६३॥

कमोहं[4] ते करिष्यामि जगत्कारणकारण ।
स्तुत त्रैलोक्यनाथेश सर्वथैव नमोऽस्तु ते ॥१२६४॥

1263-64. O giver of desired wishes, O destroyer of sins, honoured by the enemy of Kāma, praised continually by the lotus-born (Brahmā) by means of four mouths, cause of the causes of the world, how should I praise you? O praised one, O lord of the three worlds, O master, salutation to you by all means !

नमः पार्श्वेषु ते देव नमस्ते सर्वतः प्रभो ।
पर्वतेषु समुद्रेषु लोकेषु गगने तथा ॥१२६५॥

नमस्तेऽस्तु नमस्तेऽस्तु सर्वत्रैव नमोऽस्तु ते ॥१२६६॥

1265-66. O god, salutation to you on sides ; O lord, salutation to you all around i.e. on the mountains, in the seas, in the worlds and in the sky. Salutation to you, salutation to you, salutation to you everywhere."

---

1. असि G
2. महत्तमः G
3. Thus संस्तुतः A
4. कां स्तुतिं G

एवं स्तुतस्तु[1] रामेण रामामाह जनार्दनः ।
राम राम महाबाहो वरं वरय सुव्रत ॥१२६७॥

1267. Eulogized thus by Rāma, Janārdana said to him : "O long-armed Rāma—possessed of good vow—ask for a boon.

वीर्येण तपसा देव स्तोत्रेणानेन सुव्रत[2] ।
परितुष्टोऽस्मि ते वत्स यथा नान्यस्य कस्यचित्[3] ॥१२६८॥

1268. O child possessed of a good vow, with your valour, penance and this hymn of praise, I am pleased as much as of none else."

परशुरामः
भृगुणा निर्मितामर्चां गृध्रकूटाग्रतः प्रभो ।
इहानयितुमिच्छामि तन्मेऽनुज्ञातुमर्हसि ॥१२६९॥

1269. Rāma (spoke) : "O lord, I want to bring here, the image erected by Bhṛgu, from the peak of Gṛdhrakūṭa. Your honour may permit me for that."

भगवान् उवाच[4]
एवं कुरु यथेष्टं ते जनो मुच्यते किल्विषात् ।
क्लेशं विना भृगुश्रेष्ठ कृतस्तेऽनुग्रहो मया ॥१२७०॥

1270. The god spoke : O best among the Bhṛgus, I have bestowed a favour upon you. Do as you like, so that the people may be freed from sin without any suffering.

---

1. श्च E, स G.
2. First and seoond pāda om. B
3. श्रीरामः B, रामः H, श्रीराम उवाच G
4. उवाच om. BH

बृहदश्वः
एवमुक्त्वा ययौ विष्णुस्तदान्तर्धानमीश्वरः ।
रामोऽपि[1] गृध्रकूटात्तां तदार्चामवतारयत् ॥१२७१॥

1271. Bṛhadaśva (said) : Having spoken thus, the lord Viṣṇu disappeared. Rāma also brought down that image from Gṛdhrakūṭa.

मध्ये चकार तां भक्त्या स्वार्चामनन्तकूटयोः ।
तां दृष्ट्वा फलमाप्नोति पुण्डरीकस्य मानवः ॥१२७२॥

1272. He erected with devotion that image which belonged to him, midway between Ananta and Kūṭa. By seeing that, a man obtains the merit of (performing) Puṇḍarīka.

रामोऽपि तपसा दीप्तो वाजिमेधमहाक्रतौ ।
दत्त्वा महीं कश्यपाय महेन्द्रपर्वतं[2] गतः[3] ॥१२७३॥

1273. Shining with austerities, Rāma also went to Mahendra Mountain, after giving the earth to Kaśyapa, in the great sacrifice (called) Vājimedha.

एवं रामेण धर्मज्ञ गृध्रकूटान्नगोत्तमात् ।
स्वाश्रमस्य समीपे तु आनीता[4] प्रतिमा शुभा[5] ॥१२७४॥

1274. O well-versed in piety, thus was the auspicious image brought by Rāma, from Gṛdhrakūṭa—the best of the mountains—to the vicinity of his hermitage.

1. अपि om. E
2. माहेन्द्रपर्वतं H, महेन्द्रगिरिं G, महेन्द्रं पर्वतं BE
3. ततः BDE, आययौ G
4. सानीता B
5. इति नीलमते आश्रमस्वामिवर्णनम् add AG, नीलमते आश्रमस्वामिमाहात्म्यम् BDF, इति श्रीनीलमतपुराणे आश्रमस्वामिमाहात्म्यम् G

Ed. Leiden v.v. 1223-1226

गोनन्द[1]:

देशस्यास्य समीपे तु तीर्थानि वदतां वर।
कथयस्वामितप्राज्ञ तस्मिंस्तीर्थे फलं च किम् ॥१२७५॥

1275. Gonanda (said) : "O best among the narrators and possessed of unlimited intelligence, tell me (about) the sacred places situated near this country and also the merit which accrues from each."

बृहदश्वः

आरुह्य गृध्रकूटं[2] तु गोसहस्रफलं लभेत्।
वितस्तामधुमत्योश्च सङ्गमे त्रिदिवं व्रजेत् ॥१२७६॥

इन्द्रकीलमथारुह्य गोसहस्रफलं लभेत्।
कुमुनारीं नदीं प्राप्य स्नातो मुच्येत किल्विषैः[3] ॥१२७७॥

1276-77. Bṛhadaśva (spoke) : "By climbing up the Gṛdhrakūṭa one gets the merit of (the gift of) one thousand cows and goes to heaven (by bathing) in the confluence of the Vitastā and the Madhumatī.

By climbing up the Indrakīla, one obtains the merit of (the gift of) one thousand cows. Having reached the river Kumunārī, one is freed from all sins by taking bath therein.

कृष्णावितस्तासंयोगे गोसहस्रफलं लभेत्।
तथा मधुमतीतीरे शाण्डिल्येन निवेशितम्[4] ॥१२७८॥

दृष्ट्वा चक्रेशमाप्नोति वह्निष्टोमफलं नरः[5]।
दृष्ट्वा दुर्गामवाप्नोति काममेव यथेप्सितम् ॥१२७९॥

1278-79. One gets the merit of (the gift of) one thousand cows (by bathing in) the confluence of the Kṛṣṇā

---

1. उवाच add C
2. गृध्रकूटे E
3. Last two pādas of v. 1277 and first two pādas of v. 1278 om. AH
4. Thus C निवेद्यताम् A, निवेशिताम् H
5. First and second pāda om. H

and the Vitastā and gets the merit of performing Vahniṣṭoma by seeing Cakreśa erected by Śāṇḍilya on the bank of the Madhumatī.

One gets the fulfilment of one's cherished desire by seeing Durgā.

तत्रैव शाण्डिली नाम नदी पापनिषूदनी[1] ।
तस्यां स्नातो दिवं याति पुरुषो गतकल्मषः ॥१२८०॥

1280. There flows also the river named Śāṇḍilī—the destroyer of sins. By taking bath in that, one becomes free from sins and goes to heaven.

शाण्डिली[2]मधुमत्योश्च स्नातो[3] यः सङ्गमे नरः ।
सर्वपापविनिर्मुक्तः स्वर्गलोकं स गच्छति ॥१२८१॥

1281. The man who takes bath in the confluence of the Śāṇḍilī and the Madhumatī, is freed from all sins and goes to heaven.

राजवासं हरिं दृष्ट्वा काममा[4]प्नोत्यभीप्सितम् ।
रजोविनिर्मलं प्राप्य स्नात्वा मुच्येत किल्बिषैः ॥१२८२॥

1282. Through a sight of Hari (called) Rājavāsa, one obtains one's desired object and after reaching Rajovinirmala, one is freed from sins by taking bath (therein).

तस्यां[5] देवी उमा स्नाता प्रथमं तु रजोवती ।
दृष्ट्वा तु गौरीशिखरं चन्द्रलोकमवाप्नुयात् ॥१२८३॥

1283. Umā, in her monthly course for the 1st time, took bath therein. Through a sight of Gauriśikhara one obtains the world of the Moon.

---

1. पापनिसूदनी H
2. शाण्डिल्योः A
3. स्नाति H
4. कार्यम् BCDEFG
5. तस्मिन् CE

Ed. Leiden v.v. 1232-1235

पूर्वमासीदुमा राजन्[1] नीलोत्पलसमप्रभा ।
सा तत्र तपसा लेभे गौरं वर्णं मनोहरम् ॥१२८४॥

1284. O king, at first her hue was like that of a blue lotus but by performing penance there, she obtained heart-enchanting fair complexion.

कृष्णपक्षेऽपि तं शैलं सज्योत्स्नमिव मानद ।
पश्यन्ति मानवा नित्यं तत्र वै[2] महदद्भुतम् ॥१२८५॥

1285. O giver of honour, it is highly strange indeed that even in the dark half (of the month), the human beings continually see that hill endowed as it were with moonlight.

तेललां भूर्जलां पुण्यामवगाह्य पृथक् पृथक् ।
तुल्यं फलमवाप्नोति गोशतस्य महीपते[3] ॥१२८६॥

1286. By plunging separately in the Telalā and in the holy Bhūrjalā, one gets the merit equal to that of (the gift of) hundred cows.

तयोस्तु[4] सङ्गमे स्नात्वा वाजपेयफलं[5] लभेत् ।
मधुमत्यास्तयोश्चैव स्नातस्य नृप सङ्गमे ॥१२८७॥

कथितं मुनिभिः पुण्यं गजदानस्य यत् फलम्[6] ।

1287-88a. By taking bath in the confluence of these two, one obtains the merit of (performing) Vājapeya. O

---

1. Thus ABCG, महाराजन् DEH
2. तत् तत्र BDEF
3. पृथक् पुथक् C, फलं लभेत् B, स मानवः H
4. श्च A
5. वाजिपेयफलं AH
6. अश्वदानफलस्य यत् BDF
7. Thus H, प्रवाहम् A, प्रभावम् BE

king, it is stated by the sages that for him who bathes in the confluence of these two and the Madhumatī, there accrues the holy merit of the gift of an elephant.

तथा प्रभवमासाद्य मधुमत्या मनोहरम् ॥१२८८॥
सर्वपापविनिर्मुक्तो रुद्रलोके महीयते।
उत्तरे मानसे स्नात्वा गोसहस्रफलं लभेत् ॥१२८९॥

1288b-89. Having reached the charming source of the Madhumatī, one is freed from all the sins and is honoured in the world of Rudra.

By bathing in Uttaramānasa, one gets the merit of (the gift of) thousand cows.

पितरस्तर्पिता स्तत्र कामान् यच्छन्त्यभीप्सितान्।
हरमुण्डे[1]नरः स्नात्वा[2] दशगोदफलं लभेत् ॥१२९०॥

1290. The forefathers who are satiated at that place give fulfilment of cherished desires.

By bathing in the (lake of) Haramuṇḍa, one gets the merit of (the gift of) ten cows.

आरुह्य तदवाप्नोति राजसूयफलं नरः[3]।
तत्र गङ्गा सरिच्छ्रेष्ठा चन्द्रभ्रष्टा प्रतिष्ठिता ॥१२९१॥

यस्यां स्नातस्य पूयन्ते सर्वपापान्यसंशयम्।
राजसूयमवाप्नोति[4] गङ्गामानससङ्गमे[5] ॥१२९२॥

1291-92. By climbing up Haramuṇḍa, a man obtains the merit of (performing) Rājasūya sacrifice.

Fallen from the moon, Gaṅgā—the best of the rivers—is situated there, by taking bath in which, all sins are certainly washed away.

---

1. Thus H, हरमुण्डं ABFG, हरिमुण्डं E. हरपुण्यं D
2. गत्वा BDEFG
3. Last three pādas of this verse om. A
4. First three pādas of this verse om. A
5. गङ्गामानससङ्गमम् A, गङ्गासागरसङ्गमे BDEF

Ed. Leiden v.v. 1240-1244a

At the confluence of Gaṅgā and Mānasa, one acquires the merit of (performing) Rājasūya.

देवतीर्थे नरः स्नात्वा भवत्युत्तरमानसे[1] ।
वालखिल्यकृतेऽगस्त्ये तुल्यतेजा महर्षिभिः ॥१२९३॥

1293. By taking bath in Devatīrtha, a man reaches Uttaramānasa.

In the Agastya (lake) constructed by the Vālakhilyas, one becomes equal to the sages, in lustre.

कालोदकं नन्दिकुण्डं शंखचक्रौ गदां तथा ।
पद्मं सकपिलातीर्थं तीर्थौ वातिकषण्डिकौ ॥१२९४॥

तीर्थमप्सरसां पुण्यं ब्रह्मणः परमेष्ठिनः ।
कृपाणीतीर्थमासाद्य प्रत्येकं गोशतं लभेत्[3] ॥१२९५॥

1294-95. Having reached Kālodaka, Nandikuṇḍa, Śaṅkha, Cakra, Gadā, Padma, Kapilātīrtha, the holy places of Vātika and Ṣaṇḍika, the holy places of the nymphs and the highest Brahmā and Kṛpāṇītīrtha, one gets at each, the merit of (the gift of) hundred cows.

कालोदकं यत्र याति नदी मानससम्भवा ।
तत्र[4] स्नातस्य पूयन्ते[5] सर्वपापान्यशेषतः ॥१२९६॥

1296. All the sins are completely washed away by bathing at the place where the river originated from Mānasa meets Kālodaka.

---

1. भवत्यमरपूजितः G
2. कृपणीतीर्थम् BE
3. फलम् A
4. ततः G
5. पूजन्ते A

देववध्वस्तथा पुण्याः पुण्यं सूर्यसरः स्मृतम् ।
तारासरः चन्द्रसरः पुण्यं कालुषकं महत् ॥१२९७॥

1297. Holy are the wives of the gods. Sūryasara is remembered to be holy; Tārāsara, Candrasara and the great Kāluṣaka are holy.

ब्रह्मणो यागभूमिश्च[1] तत्र पुण्या[2] महीपते ।
शक्रतीर्थं[3] देवतीर्थं तीर्थं ब्राह्मणकुण्डिका[4] ॥१२९८॥

दृष्ट्वैकैकम[5]थैतेभ्यो गोशतस्य फलं लभेत् ।
हंसद्वारं च संगम्य स्वर्गमाप्नोत्यसंशयम् ॥१२९९॥

1298-99. O lord of the earth, there is the holy place of the sacrifice of Brahmā. By seeing every one of these, namely, Śakratīrtha, Devatīrtha and Brāhmaṇakuṇḍi-kātīrtha, one obtains the merit of (the gift of) a hundred cows. Having reached Haṃsadvāra, one certainly attains heaven.

सिन्धोः प्रभवमासाद्य राजसूयफलं लभेत्[6] ।
पौण्डरीकमवाप्नोति स्नात्वा बिन्दुसरस्यपि[7] ॥१३००॥

1300. Having arrived at the source of the Sindhu, one gets the merit of (performing) Rājasūya, and by bathing in Bindusara one gets that of (performing) Puṇḍarika.

---

1. गायभूमिश्च BE, यागभूमि च H
2. पुण्यं BE पुण्यां, H
3. चक्रतीर्थं C, चन्द्रतीर्थं D
4. ब्राह्मणकुण्डकम् B, v.v. 1299-1319b om. H
5. दृष्ट्वैकैक्यम् ed. Leiden
6. भवेत् G
7. गोऽत्राप्येति धृतव्रतः G

Ed. Leiden v. v. 1248-1251

मडवायां[1] नरः स्नात्वा गोसहस्रं फलं[2] लभेत् ।
सन्ध्यां नाम नदीं दृष्ट्वा मुच्यते सर्वकिल्विषैः ॥१३०१॥

1301. By taking bath in the Maḍavā, one gets the merit of (the gift of) thousand cows and by seeing the river named Sandhyā, one is freed from all sins.

अश्रद्धधानं[3] नातीत्य[4] साध्वभ्येति[5] दृढव्रतम्[6] ।
तत्राग्नितीर्थं दृष्ट्वैव वह्निलोके महीयते ॥१३०२॥

1302. Not going to the unfaithful, she approaches nicely one who is possessed of unfailing vow. By merely seeing there the holy place of Agni, one is honoured in the world of Agni.

नदी चित्रपथा पुण्या[7] मृगनन्दा तथा मृगा[8] ।
गोदावरी वैतरणी तथा मन्दाकिनी शुभा ॥१३०३॥

चन्द्रभागा गोमती च सर्वपापभयापहा ।
पृथगेतास्वाप्नोति गोशतस्य फलं नरः ॥ १३०४॥

1303-4. Holy is the river Citrapathā and so also Mṛganandā and Mṛgā. One gets the merit of (the gift of) a a hundred cows through every one of these, namely, Godāvarī, Vaitaraṇī, auspicious Mandākinī, Candrabhāgā and Gomatī, the remover of all sins and fears.

---

1. मनुवायां BE
2. गोसहस्रफल A
3. अश्रद्धधानं ed. Leiden
4. नदीं यः ed. Leiden
5. नाभ्येति साध्वभीत्य BEF, साधुभीत्या C
6. Thus AC, दृढव्रतः other MSS. v.v., 1302b-1319a om. A
7. मृगचित्रमथोपुण्यं E
8. मृगा तथा G
9. स्नात्वा सुविधिनाप्नोति G, पृथगेता अवाप्नोति ed. Leiden

Ed. Leiden v.v. 1252-1255

यत्र चित्रपथा पुण्या मडवा[1] च महानदी ।
एकीभवन्ति स्नातस्य तत्र नश्यति किल्बिषम् ॥१३०५॥

स्वर्गलोकमवाप्नोति पुनाति स्वकुलं नरः ।
तथा चैता महानद्यः कथितास्ते महीपते ॥१३०६॥

1305-6. The sins of a person who bathes at the place where the holy Citrapathā and the great river Maḍavā meet, are destroyed. Moreover, he attains heaven and purifies his family. O king, these great rivers have been described to you.

तासां तु सङ्गमाः पुण्याः सर्वे स्वर्लोकदर्शनाः[2] ।
चित्रकूटो गिरिः पुण्य उमा[3] यत्र विवाहिता ॥१३०७॥

1307. Their confluences are sacred and give heaven as award. Sacred is the mountain Citrakūṭa where Umā was married.

तत्रानुलेपनं दिव्यं येन लिप्ततनुर्नरः[4] ।
सुरूपभागी[5] भवति सुभगश्चैव जायते ॥१३०८॥

1308. There is the celestial ointment by anointing the body with which, a man becomes possessed of a beautiful form and good gifts.

---

1. मनुवा BDE
2. सर्वे स्वर्लोकदर्शिनः C, स्वर्गलोकफलप्रदाः ed. Leiden
3. गौरी G, पुण्यतमा C
4. यदालिप्तनुर्नरः ed. Leiden
5. रूपभागेव BD

पदं[1] गव्यसरस्तत्र[2] पञ्चगव्यसरः पृथक् ।
तत्रान्ये[3] पञ्च भूपाल पुण्यं तैलसरस्तथा[4] ॥१३०९॥

उद्वर्तनसरः[5] पुण्यं पुण्यं चाप्यतसीसरः[6] ।
सिद्धार्थकसरस्तत्र तथामलकवारिणः ॥१३१०॥

मधुपर्कसरः पुण्यं पुण्यमुष्णोदकं तथा ।
एकमेकमथैतेभ्यो दृष्ट्वा स्वर्लोकमाप्नुयात् ॥१३११॥

1309-11. There is Gavyasara and Pañcagavyasara. O king, there are five other (lakes) and also the sacred Tailasara, the sacred Udvartanasara, the sacred Atasīsara, Siddhārthakasara and the (lake filled with the) water of the Myrobalan fruit (āmalakavāri). There is the holy Madhuparkasara and the holy Uṣṇodaka. One obtains heaven by seeing every one of these.

चित्रकूटमथारुह्य स्वर्गलोके महीयते ।
तीर्थं सप्तर्षि[7] नाम सर्वकामफलप्रदम् ॥१३१२॥

1312. One is honoured in heaven by climbing up the Citrakūṭa. There is a holy place named Saptarṣi which gives the fruit of all desires.

---

1. Thus BCDEF, तत्रादिमं G
2. om. G
3. तथान्ये G
4. परम् G
5. तद्वर्तनसरः C
6. च सरसीसरः C, समसीसरः BEF, सममीसरः D
7. सप्तऋचं BF, सप्तदशं G

अश्वमेधसहस्रस्य राजसूयशतस्य च ।
गवां शतसहस्रस्य[1] श्रेयान् सप्तऋषेश्चरुः ॥१३१३॥

1313. The offering of boiled rice to Saptarṣi is more efficacious than (the performance of) one thousand Aśvamedhas, one hundred Rājasūyas and (the gift of) one lac cows.

श्राद्धं दानं तथा जप्यं स्नानं होमं[2] तथार्चनम् ।
सर्वमक्षयतां याति यत् कृतं तत्र पार्थिव ॥१३१४॥

1314. O king, funeral ceremonies, charity, recital of the name of the God, bath, sacrifice and worship, all these become imperishable when performed at that place.

वस्त्रापदमथासाद्य रुद्रलोके महीयते ।
छागलेश्वरमासाद्य काममाप्नोत्यभीप्सितम् ॥१३१५॥

1315 Having arrived at Vastrāpada, one is honoured in the world of Rudra and after reaching Chāgaleśvara, one gets one's desire fulfilled.

रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ।
परोष्णीप्रभवं प्राप्य गोसहस्रफलं लभेत् ॥१३१६॥

1316. Having become an attendant of Rudra, one enjoys oneself in His company. By reaching the source of Paroṣṇī, one obtains the merit of (the gift of) one thousand cows.

उष्णोदकमथासाद्य गोसहस्रफलं लभेत्[3] ।
सहस्रधारमासाद्य विष्णुलोके महीयते[4] ॥१३१७॥

1317. After bathing in Uṣṇodaka one gets the merit of giving one thousand cows in charity and having reached Sahasradhāra, one is honoured in the world of Viṣṇu.

---

1. Second and third pādas om. G
2. होमस्तथा G
3. ......तु नरः स्नात्वा दशगोदफलं लभेत् cd. Leiden
4. vv. 1317-1322a om. D

Ed. Leiden v.v. 1264-1268

क्रमता विष्णुना लोकान् कृतं पादेन तत् सरः ।
क्रमसारमिदं प्रोक्तं यथा[1] विष्णुपदं च तत् ॥१३१८॥

इष्टवान् क्रतुभिस्तत्र यदा देवः पितामहः ।
क्रमसारस्तदा प्रोक्तः सर्वकल्मषनाशनः[2] ॥१३१९॥

वसतिस्तत्र नागस्य कौण्डिन्यस्य यदा तदा[3] ।
कौण्डिन्यसर इत्येव तस्य नाम प्रकीर्तितम् ॥१३२०॥

1318-1320. Viṣṇu, while stepping over the worlds, created that lake by means of his foot, so it is called Kramasāra as is the other place Viṣṇupada. When the god Brahmā performed Vedic sacrifices there, then that Kramasāra came to be spoken of as the destroyer of all sins. When there was the abode of the Nāga Kauṇḍinya, then that place became famous by the name Kauṇḍinyasara only.

तत्र स्नात्वा समभ्यर्च्य देवताः पितरस्तथा[4] ।
दृष्ट्वा तु शिखरान् रम्यान् ब्रह्म-विष्णु-महेश्वरान् ॥१३२१॥

लोकत्रयमवाप्नोति तेषामेव न संशयः ।

1321-22a. By worshipping the gods and the manes, by seeing three beautiful peaks (named) Brahmā, Viṣṇu and Maheśvara, and after having taken bath therein, one certainly obtains the three worlds of those (gods).

1. तदा G
2. सर्वकिल्विषनाशनः E
3. Second Pādā om. E
4. देवताश्च पितॄंस्तथा G

ब्रह्मणो यागभूमिं तु[1] दृष्ट्वा तत्र महीयते ॥१३२२॥
स्वर्गलोकमवाप्नोति कुलमुद्धरते स्वकम् ।
तत्र क्षीरसरो रम्यं दृष्ट्वा मुच्यते[2] किल्विषैः[3] ॥१३२३॥

1222b-23. O lord of the earth, one attains heaven and saves one's family by seeing the sacrificial place of Brahmā there. By seeing there the beautiful Kṣīrasara, one is released from sins.

समाराप्रभवं[4] प्राप्य स्नात्वा कृष्णचतुर्दशीम् ।
सर्वपापविनिर्मुक्तो रुद्रलोके महीयते ॥१३२४॥

1324. By bathing on the dark 14th after reaching the source of the Samārā, one is freed from all the sins and is honoured in the world of Rudra.

सन्निकृष्टानि तीर्थानि कथितानि मया तव ।
सर्वेषां पापहर्तृणि किं भूयः कथयामि ते ॥१३२५॥

1325. I have narrated to you the sacred places which are near and which remove the sins of all. What else should I tell you ?"

गोनन्दः[5]
तीर्थानि द्विज मुख्यानि कश्मीरायां[6] वदस्व मे ।
तेषां स्नाने च यत् पुण्यं तपसादग्धकिल्विष ॥१३२६॥

1326. Gonanda (spoke) : "O twice-born, with (your) sins burnt by austerites, tell me about the prominent tīrthas in Kaśmīrā and about the merit which can be obtained by taking bath in them."

---

1. च AH
2. मुच्येत DE
3. किल्विपात् BEFH
4. Thus H, सरामा—A, ससार—D, सुमारा—G
5. उवाच add FH
6. कश्मीरेषु G

Ed. Leiden v.v. 1273b-1277

बृहदश्वः

निःसृता सरसः पुण्या[1] क्रमसारा[2]न्महानदी ।
कौण्डिन्या नाम[3] या स्नाने पुण्डरीकफलप्रदा ॥१३२७॥

तथा क्षीरनदी पुण्या गोशतस्य फलप्रदा
तयोः समागमे स्नात्वा गोसहस्रफलं लभेत् ॥१३२८॥

1327-28. Bṛhadaśva (said): "The sacred great river named Kauṇḍinyā originating from the lake Kramasāra gives, through bath, the merit of (performing) Puṇḍarīka. And the holy river Kṣīra is the giver of the merit of (the gift of) a hundred cows. One gets the merit of (giving) one thousand cows by bathing in the confluence of both of them.

विशोकायां नरः स्नात्वा[4] विशोकः श्रीसमन्वितः[5] ।
फलं पुण्यम[6]वाप्नोति देवसत्रस्य मानवः ॥१३२९॥

1329. A man becomes devoid of grief and possessed of wealth, by taking bath in the Viśokā and obtains the holy merit of (performing) Devasattra.

कौण्डिनी सह संयोगं यत्र याति विशोकया ।
तत्र स्नातस्य राजेन्द्र वाजपेयफलं भवेत्[7] ॥१३३०॥

1330. O chief of the kings, one gets the merit of (performing) Vājapeya, by taking bath at the place where the Kauṇḍinī meets the Viśokā.

---

1. पुण्यात् B
2. क्रमसारा H
3. कौण्डिन्यनाम्नी G
4. First pāda om. BDEF
5. Second pāda om. BD
6. पुण्यं फलं BEFG
7. लभेत् ABDE

वृद्धतीर्थे नरः स्नात्वा यज्ञमाप्नोति गोसवम् ।
तत्र संनिहितो नित्यं[1] वासुकिर्भुजगाधिपः ॥१३३१॥

1331. A man gets (the merit of performing) the sacrifice Gosava, by taking bath at Vṛddhaṭīrtha. Vāsuki—the lord of the Bhujagas—is always present there.

देवलोकमवाप्नोति स्नात्वा देवसरस्यपि[2] ।
अग्नितीर्थे नरः स्नात्वा वह्निलोकमवाप्नुयात्[3] ॥१३३२॥

1332. By bathing in Devasara, a man obtains the world of gods and by bathing at Agnītīrtha he obtains the world of Agni.

नदी सरस्वती नाम यस्यां स्नातो दिवं व्रजेत् ।
पूर्वदक्षिणभागे तु[4] स्थिता[5] देवसरस्यपि ॥१३३३॥

1333. In the south-eastern portion of Devasara is present the river named Sarasvatī, by bathing in which, a man goes to heaven.

विनतास्वामिपुरतः कद्रू[6]स्वामिसमीपतः ।
तीर्थयोस्तु[7]नरः स्नात्वा गोशतस्य फलं लभेत् ॥१३३४॥

1334. A man obtains the merit of (the gift of) a hundred cows by bathing in two tīrthas, one in front of Vinatāsvāmi and the other near Kadrūsvāmi.

---

1. संनिहितो नित्यं om. G
2. अथ BCDEFG
3. प्रपद्यते H, स गच्छति CE
4. ऽपि A
5. अथ G, तु BDEF
6. द्रू om. and space for one letter left A
7. श्च H

Ed. Leiden v.v. 1282-1285

सन्ध्या देवी नदी पुण्या यस्यां स्नातस्य मानद ।
व्यपैति कल्मषं देहात् स्वर्गलोकं च गच्छति ॥१३३५॥

1335. O giver of honour, there is the goddess Saṃdhyā, the holy river, by bathing in which, sin is removed from the body and one goes to heaven.

सन्ध्या पुष्करिणी त्वन्या पूर्वतुल्यफलप्रदा ।
अवगाह्य नरो भक्त्या पुण्यां ब्राह्मणकुण्डिकाम्[1] ॥१३३६॥

नीलकुण्डं[2] वितस्ताख्यं[3] शूलघातं तथैव च ।
तीर्थं त्रिनामकं[4] दृष्ट्वा[5] स्वर्गलोके महीयते ॥१३३७॥

1336-37. Saṃdhyā Puśkariṇī is another (holy place) which gives the merit equal to that of the previous one. One is honoured in heaven after plunging with devotion into the holy Brāhmaṇakuṇḍikā and after seeing the holy place bearing three names Nīlakuṇḍa, Vitastākhya and Śūlaghāta.

तथा विनशनं[6] प्राप्य वाजपेयफलं[7] लभेत् ।
ब्राह्मणकुण्डिकायां च नीलकुण्डे च पार्थिव ॥१३३८॥

अक्षयं सर्वमुद्दिष्टं दानं श्राद्धं तथा तपः[8] ।
वितस्तोन्मज्जने[9] स्नात्वा गोसहस्रफलं लभेत् ॥१३३९॥

1338-39. Having reached Vinaśana, one gets the merit of (the performance of) Vājapeya. Charity, funeral cere-

1. Thus other MSS., पुण्या ब्राह्मणकुण्डिका AH
2. Thus G, नीलकुण्डो BCEF, नीलकुण्ड AH
3. Thus BG, वितस्ताख्य: EF, वितस्ताख्या ACH
4. त्रिनामिकं E
5. स्नात्वा A
6. विनयनं H, विनाशनं E
7. Thus other MSS., वाजिपेयफलं AH
8. श्राद्धं दानं तपस्तथा A
9. वितस्ताया जले B

monies and penance (performed) at Brāhmaṇakuṇḍikā and Nīlakuṇḍa, are stated to be imperishable. By bathing in Vitastonmajjana, one obtains the merit of (giving) one thousand cows.

पञ्चयज्ञानवाप्नोति स्नात्वा वै[1] पञ्चहस्तके[2] ।
प्रत्यहं ये विनिर्दिष्टा गृहस्थस्य महीपते ॥१३४०॥

1340. O lord of the earth, by bathing in Pañcahastsaka, one obtains the (merit of performing) five sacrifices which a householder is required to perform daily.

लोकपुण्यं[3] हि तन्नाम सर्वपापहरं परम्[4] ।
कापोतके[5] नरः स्नात्वा गोप्रदानफलं लभेत् ॥१३४१॥

1341. Lokapuṇya is, verily, the remover of all sins. By bathing in Kāpotaka, a man gets the merit of giving a cow.

विष्ण्वाश्रमे नृसिंहस्य पुरतः[6] पार्थिवोत्तम ।
वितस्तोन्मज्जनं पुण्यं[7] विष्णुलोके महीयते ॥१३४२॥

1342. O best of the kings, Vitastonmajjana in the hermitage of Viṣṇu in front of Nṛsimha is holy. One is honoured in the world of Viṣṇu (by bathing in that).

---

1. स्नात्वैव G
2. vv. 1336-1340 a om. D
3. लोकं पुण्यं हि ABC, लोकं हि पुण्यं H
4. शुभम् E, पुण्यलोकोऽस्त्यसौ नाम सर्वपापहरः परः G
5. कामोतके E
6. परत: F
7. तत्र स्नात्वा च भक्तित: G

Ed. Leiden v. v. 1291-1293

स्नातस्य ध्यानधारिण्यां गोसहस्रफलं भवेत्[1] ।
वितस्ताध्यानधारिण्योः संगमे पापनाशने ॥१३४३॥

पुण्यं फलमवाप्नोति वाजपेयस्य[2] मानवः ।
वितस्तान्तर्हिता तत्र प्रविश्य ध्यानधारिणीम् ॥१३४४॥

1343-44. The merit of (the gift of) one thousand cows accrues for him who bathes in the Dhyānadhāriṇī, and by bathing in the sin-destroying confluence of the Vitastā and the Dhyānadhāriṇī, a man obtains the holy merit of (performing) Vājapeya. Having entered the Dhyānadhāriṇī, the Vitastā disappeared at that place.

अन्तर्हिता गता शीघ्रं विशोका यत्र निम्नगा ।
धौम्याश्रमे तयोर्योगे[3] राजसूयफलं स्मृतम्[4] ॥१३४५॥

1345. The river Viśokā, concealing herself, reached that place soon. The merit of (performing) Rājasūya is considered to accrue at the confluence of these two at Dhaumyāśrama.

चतुर्वेदीं नरो[5] दृष्ट्वा कन्यादानफलं लभेत् ।
प्राप्य हर्षपथां[6] जन्तुर्लभेद् बहु सुवर्णकम् ॥१३४६॥

1346. By seeing Caturvedī, a man gets the merit of giving a daughter (in marriage).

Having arrived at the Harṣapathā, a human being obtains much gold.

---

1. Thus ed. Leiden, लभेत् A[B]CDEFGH
2. वाजिपेयस्य H
3. योगं BCE
4. Thus DEFH, भवेत् G, लभेत् other MSS.
5. नदीं G
6. हर्षपदां B

त्रिकोटीप्रभवं प्राप्य मुच्यते सर्वकिल्विषैः ।
प्राप्य चन्द्रवतीजन्म चन्द्रलोके महीयते ॥१३४७॥

1347. By reaching the source of Trikoṭī, one is freed from all sins and having reached the source of the Candravatī, one is honoured in the world of the Moon.

देवतीर्थे नरः स्नात्वा देवः[1] पुत्रोऽपि जायते[2] ।
त्रिकोट्यां तु नरः स्नात्वा देवलोके महीयते[3] ॥१३४८॥

1348. By bathing in Devatīrtha one becomes a god and gets a son. And by bathing in Trikoṭī, a man is hononred in the world of the gods.

स्नात्वा हर्षपथायां[4] च शक्रलोके महीयते ।
चन्द्रवत्यां नरः स्नात्वा दशगोदफलं लभेत् ॥१३४९॥

1349. By bathing in Harṣapathā, one is honoured in the world of Śakra and by bathing in Candravatī one gets the merit of (giving) ten cows.

नदी हर्षपथा पुण्या तथा चन्द्रवती च या ।
सङ्गमं[5] यत्र तत्रोक्तं, राजसूयं मनीषिभिः[6] ॥१३५०॥

1350. Holy is the river Harṣapathā and so also is Candravatī. The wise say that there accrues (the merit of the performance of) Rājasūya at the confluence of these two.

---

1. Thus ed Leiden, देव्याः पुत्रोऽपि ABEH, देव्याः पित्रोपि FD
2. 1348 a om. C
3. 1348 b and 1349 a om. E
4. In Devanāgari script F
5. Thus ACFH, सङ्गमः D, सङ्गमे ed. Leiden
6. सङ्गमे चानयोः प्रोक्तं राजसूयफलं बुधैः G
Ed. Leiden, v.v. 1297b-1300

त्रिकोटीसङ्गमाद गृह्य[1] यावद् रौप्येश्वरं हरम्[2] ।
तावत् क्षेत्रं समं ज्ञेयं[3] वाराणस्याथवाधिकम्[4] ॥१३५१॥

1351. The area beginning from the confluence of Trikoṭī up to Raupyeśvara Hara should be regarded equal (in merit) to Vārāṇasī or even more powerful.

रुद्रलोकमवाप्नोति स्नात्वा तु कपटेश्वरे[5] ।
विषलिङ्गह्रदे पुण्ये रुद्रलोके महीयते ॥१३५२॥

1352. One attains the world of Rudra by taking bath in Kapaṭeśvara and is honoured in the world of Rudra (by taking bath) in the holy Viṣaliṅgahrada.

विजयेशाग्रतः स्नात्वा वितस्तायां महीपते ।
रुद्रलोकमवाप्नोति कुलमुद्धरते स्वकम्[6] ॥१३५३॥

1353. O lord of the earth, one attains the world of Rudra and saves one's family by taking bath in the Vitastā in front of Vijayeśvara.

पिङ्गलेशाग्रतः स्नात्वा विष्णुलोके महीयते ।
खण्डपुच्छाश्रमे स्नात्वा फलमेतदुदाहृतम्[7] ॥१३५४॥

1354. One is honoured in the world of Viṣṇu by taking bath in front of Piṅgaleśa and the same merit is stated to accrue from a bath at the hermitage of Khaṇḍapuccha.

---

1. चापि G
2. हरिम् G
3. विजानीयात् A
4. वाराणस्यां महीपते BDFG
5. कपटेश्वरीम् H
6. vv. 1352-53 om. A, vv. 1352-53 a om. B
7. पुण्डरीकफलं लभेत् A

पुण्डरीके[1] नरः स्नात्वा पुण्डरीकफलं लभेत्[2] ।
शूर्पारके[3] नरः स्नात्वा गोप्रदानफलं लभेत् ॥१३५५॥

1355. By taking bath in Puṇḍarīka, a man gets the merit of (performing) Puṇḍarīka sacrifice and by bathing in Śūrpārka, one obtains the merit of the gift of cows.

वितस्ताध्यानधारिण्योः सङ्गमेऽन्नप्रदो[4] नरः ।
अक्षयं फलमाप्नोति यावदिन्द्राश्चतुर्दश ॥१३५६॥

1356. One who gives food in charity at the confluence of the Vitastā and the Dhyānadhāriṇī, gets merit which remains imperishable so long as there are the fourteen Indras.

सर्वे सन्निहितास्तीर्था नरसिंहाश्रमे तदा ।
वितस्ताध्यानधारिण्योः सङ्गमाद् गृह्य पार्थिव[5] ॥१३५७॥

कल्पषोडशनागस्य[6] यावद् भवनमुत्तमम् ।
तावत् क्षेत्रं समं पुण्यं प्रयागेण नराधिप ॥१३५८॥

1357-58. All the sacred places are present, at that time, in the hermitage of Narasiṃha. O lord of men, the area beginning from the confluence of the Vitastā and the Dhyānadhāriṇī up to the worthy abode of the Nāga Kalpa-ṣodaśa is as holy as Prayāga.

---

1. पौण्डरीके BDE, पुण्डरीकं H
2. First and second pāda om. A
3. शीर्पारके DEF, शीर्षारके B
4. गोप्रदो A
5. सङ्गमाश्चैव भूपते G, पर्वते E, पार्वति B
6. कल्पशोडशनागश्च E, कल्पश्वोण्डशनागस्य A

गङ्गोद्भेदे[1] नरः स्नात्वा भेडादेवी[2]समीपतः ।
गङ्गास्नानफलं प्राप्य स्वर्गलोके महीयते ॥१३५९॥

1359. By taking bath in Gaṅgodbheda near Bheḍādevī, a man obtains the merit of bathing in the Gaṅgā and is honoured in heaven.

अवगाह्य कथां पुण्यां दशगोदफलं लभेत्[3] ॥१३६०॥
औजसे धर्मराजस्य स्नात्वा तु पुरतो नरः ।
न दुर्गतिमवाप्नोति वाजपेयफलं[4] लभेत् ॥१३६१॥

1360-61. By plunging in the holy Kathā, one gets the merit of the gift of ten cows and by bathing in Aujasa in front of Dharmarāja, one does not reach the state of misery and obtains the merit of (performing) Vājapeya.

तस्मिंस्तीर्थवरे राजन् श्राद्धमानन्त्यमश्नुते ।
मासि चाश्वयुजे कृष्ण[5]पञ्चदश्यां विशेषतः ॥१३६२॥

1362. O king, one enjoys endlessly, the meals offered after death at that holy place, specially on the dark fifteenth of the month Āśvayuj.

स्नात्वा नारायणस्थाने[6] विष्णुलोके महीयते ।
रामतीर्थे भवोत्से[7] च फलमेतत् प्रकीर्तितम् ॥१३६३॥

1363. One is honoured in the world of Viṣṇu by taking bath at Nārāyaṇasthāna and a similar merit is stated to accrue at Rāmatīrtha and Bhavotsa.

---

1. सङ्गोद्भेदे B
2. भीडादेवी H
3. दशगोदानजं फलम् A
4. वाजिपेयफलं H
5. कृष्णे A
6. नारायणं स्थानं H

7. भवेत् स B

Ed. Leiden v.v. 1309-1312

शैलपृष्ठे नरः स्नात्वा तीर्थे वैश्रवणस्य च[1]
धनस्य भागी भवति यत्र यत्राभिजायते ॥१३६४॥

1364. By taking bath at Śailapṛṣṭha and the holy place of Vaiśravaṇa, one is sure to possess wealth, wherever he may be born.

कामतीर्थे नरः स्नात्वा कामभागभिजायते ।
तीर्थे चा[2]प्सरसां स्नात्वा श्रीभागी भवते नरः[3] ॥१३६५॥

1365. Having bathed at Kāmatīrtha, a man obtains the fulfilment of his desires and having bathed at Apasarastīrtha, he becomes possessed of beauty.

ऋषितीर्थे नरः स्नात्वा निर्मलो मुनिवद् भवेत् ।
वैतरण्यां नरः स्नात्वा न दुर्गतिमवाप्नुयात्[4] ॥१३६६॥

1366. By bathing at Ṛṣitīrtha, one becomes pure like a sage and by bathing in Vaitaraṇī, one does not reach the state of misery.

ऋषिकुल्यामथासाद्य देवकुल्यां तथैव च ।
अश्वतीर्थं प्रभासं च वारुणं तीर्थमेव च ॥१३६७॥

वह्नितीर्थं चन्द्रतीर्थं नागतीर्थं तथैव च ।
चक्रतीर्थं[5] वामनं च गोप्रदानफलं लभेत् ।१३६८॥

1367-68. One gets the merit of the gift of cows by arriving at Ṛṣikulyā, Devakulyā, Aśvatīrtha, Prabhāsa, Vāruṇa, Vahnitīrtha, Candratīrtha Nāgatīrtha, Cakratīrtha and Vāmana.

---

1. तु BEFG
2. वा A
3. श्रीभाग् नरोत्तमः G, श्रीभागी भविता नरः A
4. आप्नुयात् A
5. शक्रतीर्थं G

स्नात्वा तु मदतीर्थे[1] च[2] स्कन्दतीर्थे[3] च मानवः ।
तथा सुरेश्वरीतीर्थे स्वर्गलोके महीयते ॥१३६९॥

1369. A man is honoured in heaven after having bathed at Madatīrtha, Skandatīrth and Sureśvarītīrtha.

माहुरीं तु समासाद्य तिलप्रस्थफलं लभेत् ।
तत्सङ्गमे वितस्तायां स्नात्वा[4] मुच्यते किल्बिषैः ॥१३७०॥

1370. Having arrived at Māhurī, one gets the merit of giving one prastha of sesame in charity and by bathing in her confluence with Vitastā, one is removed from sins.

त्रिपुरेशाग्रतः पुण्यामवगाह्य तु[5] माहुरीम् ।
महादेवगिरिं दृष्ट्वा रुद्रलोके महीयते ॥१३७१॥

1371. One is honoured in the world of Rudra by seeing the mountain Mahādeva after having a plunge in the Māhurī in front of Tripureśa.

अमरेशे नरः स्नात्वा गोशतस्य फलं लभेत् ।
मालिन्यां तु नरः स्नात्वा दशगोदफलं लभेत्[6] ॥१३७२॥

1372 By bathing at Amareśa, a man may get the merit of(the gift of) a hundred cows and by bathing in the Mālinī, one may get the merit of giving ten cows.

---

1. नर्मदातीर्थे B, मरुतीर्थे G, भृवते तीर्थे A
2. Om. A
3. स्वान्दतीर्थे A
4. स्नातो BEG
5. च A
6. दशगोदानजं फलम् A

स्नात्वा पाण्डवतीर्थे च पञ्चयज्ञानुपाश्नुते ।
उच्चेशं तीर्थं[1]मासाद्य रुद्रलोके महीयते ॥१३७३॥

1373 Having bathed at Pāṇḍavatīrtha, one enjoys the merit of (performing) the five sacrifices and having arrived at Uccesatīrtha, one is honoured in the world of Rudra.

स्नात्वा रामह्लदातोये[2] लभेद् बहु सुवर्णकम्[3] ।
मालिनीसङ्गमं पुण्यं[4] सिन्धुना सह पार्थिव ॥१३७४॥

तथा रामह्लदा यत्र युज्यते सह सिन्धुना ।
तयोः फलमथोद्दिष्टं राजसूयाश्वमेधयोः ॥१३७५॥

1374-75. One gets much gold by bathing in the water of the Rāmahradā. O king, the merit of (bathing) both at the confluence of the Mālinī with the Sindhu and at the place where the Ramahradā meets the Sindhu is stated to be equal to (that of the performance of) Rājasūya and Aśvamedha.

संयोगं सिन्धुना यत्र गता कनकवाहिनी ।
गोसहस्रमवाप्नोति धनवानभिजायते[5] ॥१३७६॥

1376. One gets one thousand cows and becomes rich by taking bath at the place where the Kanakavāhinī joins the Sindhu.

---

1. उच्चेशतीर्थे B, उच्चीशतीर्थं E
2. रामह्लदे तीर्थे A, रामह्लदे तोये H
3. भवेद् वहु सुवर्णभाग् G
4. —सङ्गमः पुण्यः G
5. अपि जायते G

पावना च नदी पुण्या रजोबिन्दुविनिर्मला[1] ।
यस्यां[2] स्नात[3]स्त्ववाप्नोति[4] पुण्डरीकफलं नरः ॥१३७७॥

तयोः समागमे पुण्ये राजसूयफलं स्मृतम् ।
तस्माद् देशादथारभ्य यावत्स्याच्चीरमोचनम्[5] ॥१३७८॥

तावत् क्षेत्रं समं पुण्यं वाराणस्याः प्रकीर्तितम्[6] ॥१३७९॥

1377-79. Holy is the river Pāvanā. (There is also) the Rajobinduvinirmalā, by taking bath in which a man obtains the merit of (performing) Puṇḍarīka. The merit of (performing Rājasūya is considered to be accruing at the holi confluence of these two (rivers). The area, beginning from that place and extending up to Cīramocana is regarded as sacred as that of Vārāṇasī.

तन्मध्ये सर्वतीर्थानां सान्निध्यं कथितं मया ।
स्वर्गमार्गप्रदं प्रोक्तं तीर्थं चीरप्रमोचनम्[7] ॥१३८०॥

1380. The sacred place Cīrapramocana is stated to be the provider of the way to heaven. The presence of all the tīrthas at that place has been mentioned by me.

---

1. राजविन्दुविनिर्मिता B
2. तस्यां G
3. स्नात्वा A
4. तमाप्नोति B
5. क्षीरमोदनम् A
6. समं स्मृतम् A, यवाधिकम् H
7. वीरप्रमोदनम् A

दिव[1]मुत्सृज्य चीराणि[2] तत्र सप्तर्षयो गताः ।
स्नात्वा तत्र दिवं यान्ति येऽपि पापकृतो[3]नराः ॥१३८१॥

1381. Leaving their clothes there, the seven sages went to heaven. By bathing there, even those who are sinners, go to heaven.

सोदरे[4] तु नरः स्नात्वा गोसहस्रफलं लभेत् ।
तथा कनकवाहिन्याः सङ्गमं याति यो नरः ॥१३८२॥

तथा कालोदका[5] पुण्या नदी यत्रैव सङ्गता ।
तयोः[6] फलं विनिर्दिष्टं राजसूयाश्वमेधयोः ॥१३८३॥

1382-83. One gets the merit of (the gift of) one thousand cows by taking bath in Sodara. The merit of(the performance of) Rājasūya and Aśvamedha is stated to accrue from both (the places), for a person who visits the confluence of the Kanakavāhinī where meets also the holy river Kālodakā.

स्नात्वाऽश्वमेधमाप्नोति वितस्तासिन्धुसङ्गमे ।
प्रौष्ठपद्यां[7] विशेषेण एवमाहुर्मनीषिणः ॥१३८४॥

1384. The wise say that by bathing in the confluence of the Sindhu and the Vitastā, specially on the full-moon day of the month Prauṣṭhapada, one obtains the merit of (the performance of) Aśvamedha.

---

1. दिव्यम् ABF
2. वीराणि A
3. पापयुता B
4. सोदरं CEF, मोदते A
5. कालोदके H
6. After तयोः the rest of the line om. F
7. Thus C, प्रोष्ठपद्यां other MSS.

Ed. Leiden v.v. 1329-1332

पात्रतीर्थे नरः स्नात्वा पुण्डरीक[1]मुपाश्नुते ।
आपगायां नरः स्नात्वा[2] कुलमुद्धरते स्वकम् ॥१३८५॥

1385. One gets the merit of (performing) Puṇḍarīka, by taking bath in Pātratīrtha and saves one's family through bath in the Āpagā.

अग्निष्टोम[3]मवाप्नोति स्नात्वा सरसि मानसे ।
आषाढ्यां तु विशेषेण नात्र कार्या विचारणा ॥१३८६॥

1386. By taking bath in the lake Mānasa, especially on the full-moon day of the month of Āṣāḍha, one gets the merit of (performing) Agniṣṭoma. There is no need to doubt this.

वाजपेयमवाप्नोति महापद्मसरस्यपि ॥१३८७॥

हिरण्या वै नदी पुण्या हरमुण्डाद्विनिःसृता[4] ।
स्नातस्तस्यामवाप्नोति ह्यग्निष्टोमफलं नरः ॥१३८८॥

1387-88 One obtains the merit of (performing) Vājapeya, (by bathing) in the lake Mahāpadma. A man gets the merit of (performing) Agniṣṭoma by bathing in the holy river Hiraṇyā which takes rise from the Haramuṇḍa.

महापद्मसरः पुण्यं हिरण्या[5] यत्र गच्छति ।
अश्वमेधफलं तत्र पौर्णमास्यां विशेषतः ॥१३८९॥

1389. One gets the merit of (performing) Aśvamedha, especially on full-moon day, (by bathing) at the place where Hiraṇyā meets the holy lake Mahāpadma.

---

1. पौण्डरीकम् BEFG
2. Second and third pādas om. A
3. Thus AC, वह्निष्टोमम् other MSS.
4. विनिर्गता G
5. हेरणा A

बहुरूपे नरः स्नात्वा विष्णुलोके महीयते ।
बहुरूपे च कथितं फलमेतन् नरोत्तम ॥१३९०॥

1390. By bathing at Bahurūpa, one is honoured in the world of Viṣṇu. This, O best among men, is stated to be the merit at Bahurūpa.

शतशृङ्गे सुतीर्थे वै[1] तीर्थे वैश्रवणस्य च ।
तीर्थे पुण्ये तथा राजन् भूर्जस्वामि[2]समीपतः ॥१३९१॥

वसूनामथ रुद्राणां साध्यानां मरुतामपि ।
विश्वेषां चैव देवानां[3] भृगूणां च नराधिप ॥१३९२॥

तथैवाङ्गिरसां राजं[4]स्तीर्थे तीर्थे पृथक् पृथक्[5] ।
दशगोदफलं प्रोक्तं मुनिभिस्तत्त्वदर्शिभिः ॥१३९३॥

1391-93. O king, the lord of men, it is stated by the sages—perceivers of true essence—that the merit of the gift of ten cows accrues separately at each sacred place, namely, the good sacred place Śatasṛṅga, the sacred place of Vaiśravaṇa, the sacred place near Bhūrjasvāmī, the places sacred to the Vasus, the Rudras, the Sādhyas, the Maruts, all the gods, the Bhṛgus and the Aṅgirās.

पालाशा[6] च शिलामा[7] च वितस्तां यत्र गच्छत.[8] ।
गोसवस्य फलं[9] तत्र प्रत्येकं कथितं पुरा ॥१३९४॥

1394. The merit of (the gift of) a hundred cows has been formerly stated for each of the (two) places where the Pālāśā and the Śilāmā meet the Vitastā.

---

1. Thus A, च other MSS.
2. भीमस्वामि—A
3. Space for two letters left before नां A
4. चैव A
5. नराधिप A
6. पालासा EGH, पलासा C, पालमा D, पालामा B
7. शमाला BDFG, शमला E, शिलासा H
8. Thus A, गच्छति other MSS.
9. Thus AH, गोसहस्रफलं G, गोशतस्य—other MSS.

Ed. Leiden v. v. 1337-1341

नदी कूलारणी यत्र संयुज्यते[1] वितस्तया ।
तत्र स्नात्वा[2] कुलं शीघ्रं पुनीते मानवोत्तमः ॥१३९५॥

1395. The best amongst men immediately purifies his family by taking bath at the place where the river Kūlāraṇī meets the Vitastā.

विगाह्य पुष्करं तीर्थमतिरात्रफलं[3] लभेत् ।
सप्तर्षीणां तु तीर्थे वै अग्निष्टोमफलं[4] लभेत्[5] ॥१३९६॥

1396. One gets the merit of (performing) Atirātra by having a plunge in Puṣkara and that of Agniṣṭoma by bathing at the holy place of the seven sages.

तीर्थं वाराह[6]मासाद्य वितस्ताम्भसि मानवः ।
विष्णुलोकमवाप्नोति कुलमुद्धरते स्वकम्[7] ॥१३९७॥

1397. A man attains the world of Viṣṇu and saves his family by reaching the sacred place Varāha in the water of Vitastā.

स्नात्वा नारायणस्थाने वितस्ताम्भसि पार्थिव[8] ।
विष्णुलोकमवाप्नोति नरो नास्त्यत्र संशयः ॥१३९८॥

1398. A man surely obtains the world of Viṣṇu by bathing in the water of the Vitastā at Nārāyaṇasthāna.

---

1. Thus A, संयुज्येत other MSS.
2. स्नातः G
3. मुनिदानफलं D, मतिदानफलं BEF, अतिदान—C
4. वह्निष्टोमफलं C
5. Third and fourth Pādas om. BEFGH, vv. 1396b-1403 om. D.
6. वाराह्यम् AE
7. Third and fourth Pādas om. A
8. First and second Pādas om. A

Ed. Leiden v. v. 1342-1345

नदी गोत्रनदी[1] यत्र वितस्तां प्रतिपद्यते ।
तयोः स्नातस्य[2] कथितं गोसहस्रस्य यत् फलम्[3] ॥१३९९

1399. For one who is bathed in both (the rivers) at the place where the river Gotranadī approaches the Vitastā, the merit of (the gift of) one thousand cows is pronounced.

माहुरी तु नदी पुण्या मथुरेव विशेषतः ।
शतनीला[4] शमाला च नदी च विमलोदका[5] ॥१४००॥

राहुला[6] च नदी पुण्या श्रीमाढ्या[7] च महानदी ।
द्वितीया च तथा शुद्धा समूला सुरसा[8] तथा ॥१४०१॥

आसां प्रत्येकशः[9] स्नात्वा लभेद् गोदानजं फलम् ।
आसामेव तु सर्वासां सङ्गमाश्च पृथक् पृथक् ॥१४०२॥

अवगाह्य नरः शुद्धो[10] दशगोदफलं लभेत्[11] ।
अनन्ततीर्थे[12] स्नातस्य नागलोके महीयते[13] ॥१४०३॥

1400-1403. The river Māhuri is specially holy like Mathurā. One obtains the merit arising from the gift of a cow by taking bath in every one of these viz. the Śatanīlā,

---

1. गोत्रवती G, सोत्रनदी A
2. स्नानस्य G
3. Thus A, गोसहस्रफलं पृथक् other MSS.
4. Thus ABEF, शतलीला GH, शतशीला ed. Leiden
5. Om. E
6. लाहुला ABF, corrected into राहुला H
7. श्रीमाख्या A
8. सरसा
9. This word in Devanagri script F
10. याति A
11. दशगोदानजं फलम् A
12. अनन्ततीर्थं AB
13. —विधीयते EF, नागलोकं भविष्यति A

the Śamālā, the river Vimalodakā, the holy river Rāhulā, the great river Śrimāḍhyā, the second Śuddhā, the Samūlā, the Surasā. A man gets the merit of giving ten cows by plunging in the confluences of all these (rivers) separately. Having bathed in Anantatīrtha, one is honoured in the world of the Nāgas.

बिन्दुनादेश्वरं तीर्थं सोमतीर्थं पृथूदकम् ।
तुङ्गेश[1]तीर्थक्षेत्रं तु[2] उतङ्कस्वामिनं जलम्[3] ॥१४०४॥

रामतीर्थं भृगोस्तीर्थं[4] तीर्थमाङ्गिरसां तथा ।
दृष्ट्वैकैकमथैतेभ्यो दशगोदफलं लभेत् ॥१४०५॥

1404-1405. One obtains the merit of giving ten cows by seeing every one of these, namely, Bindunādeśvaratīrtha, Somatīrtha, Pṛthūdaka, Tuṅgeśatīrthakṣetra, Utaṅkaśvāmī, Rāmatīrtha, Bhṛgutīrtha and the holy place of Aṅgirās.

सर्वाः सरिद्वराः पुण्याः सर्वे[5] प्रस्रवणास्तथा ।
इमे च राजेन्द्र तथा सर्वे पुण्याः शिलोच्चयाः ॥१४०६॥

1406. O king, all the good rivers and the fountains are sacred and all these mountains are also sacred.

सर्वा ऋषिकृताश्चार्चाः सरांसि विपुलानि च ।
सर्वत्रव महीनाथ[6] कश्मीरेषु[7] विशेषतः ॥१४०७॥

1407. O lord of the earth, all the images erected by the sages, and all the great lakes (are holy) everywhere but specially so in Kaśmīra.

---

1. तुङ्गेशं A
2. च A
3. तथा ed. Leiden.
4. भृगुतीर्थं F
5. सर्वाः BE
6. महीपाल E
7. काश्मीरेषु E

Ed. Lieden v. v. 1351-1354

सर्वे च सङ्गमाः पुण्या नागानां ये जलाशयाः ।
सुवर्णशतदानस्य फलं प्राप्नोत्यसंशयम्[1] ॥१४०८॥

1408. Holy are all the confluences and the pools of the Nāgas. One surely obtains the merit of the gift of hundred Suvarṇas (by bathing in them).

इति तीर्थानि पुण्यानि वितस्ता च विशेषतः ।
सर्वत्र पावनी देवी वितस्ता कथिता नृप १४०९॥

1409. Holy are these sacred places and specially so is the Vitastā. O king, the goddess Vitastā is stated to be purifying everywhere.

तस्यां स्नात्वा दिवं यान्ति येऽपि पापकृतो[2] नराः ।
वह्निष्टोममवाप्नोति स्नातस्तस्यां नराधिप ॥१४१०॥

1410. Even those men who are sinners go to heaven by bathing in that. O lord of men, one gets the merit of (performing) Vahniṣṭoma by bathing in that.

दृष्ट्वाश्रमे वितस्ताख्ये[3] धौम्येशे[4] सिन्धुसङ्गमे ।
वराहतीर्थे पापघ्ने राजसूयफलप्रदे[5] ॥१४११॥

सदैव पुण्या शुक्ले[6] च त्रयोदश्यां विशेषतः ।
यत्र तत्र वितस्तायां गोरजोधूतमस्तकः[7] ॥१४१२॥

स्नात्वा त्रयोदशीं शुक्लां मुच्यते सर्वकिल्बिषैः ॥१४१३॥

1411-1413. One, with one's forehead anointed with goraja, is freed from all sins, by seeing (the river Vitastā)

---

1. असंशयः ed. Leiden
2. पापकृताः A
3. वितस्तेयं G
4. धौम्येश—AF
5. —प्रदा G
6. पुण्यतीर्थे E, पुण्यशुक्ले AB
7. गोरजाधूतमस्तका BEFH, third and fourth pādas om. A Ed. Leiden v. 1355-1359

and by bathing in the Vitastā on the bright thirteenth, at the places where the Vitastā is holy always but is specially so on the bright thirteenth of a month. (The places are) the hermitage Vitastākhya, Dhaumyeśa, the confluence of (the Vitastā and) the Sindhu, and Varāhatīrtha which destroys the sins and gives (the merit of performing) Rājasūya.

अदृश्यं मानवः[1] कृत्वा पातकं मुक्तपञ्चकम् ।
स्नानेनैकेन सलिलशिशिरेण[2] व्यपोहति ॥१४१४॥

1414. A man who has committed any invisible sin except the five (great sins), removes (that sin) away by one bath in the cold water.

अनर्काभ्युदिते[3] काले[4] सकलं शिशिरं यदि ।
तत्र[5] स्नातो[6]नरो राजन् कामानाप्नोत्यभीप्सितान् ॥१४१५॥

1415. O king, a man gets his desired objects if he takes bath there, before sun-rise, for the whole winter.

स्नात्वा यथावद् विधिना समभ्यर्च्य हुताशनम् ।
ब्राह्मणेभ्यस्तदा[7] दत्वा कृसरं घृतसंयुतम् ॥१४१६॥

स्वर्गलोकमवाप्नोति यावदिन्द्राश्चतुर्दश ॥१४१७॥

1416-1417. One attains heaven so long as there are the fourteen Indras, by bathing properly, worshipping the fire in the right procedure and then offering boiled rice and pulses mixed with purified butter to the Brāhmaṇas.

---

1. मानवैः B
2. सलिले शैशिरेण A, सलिलं शिशिरेण B
3. अनर्काभ्युदये BEF
4. काले तु A
5. अत्र G
6. स्नाति G
7. तथा H

एवं संवत्सरं पूर्णं नित्यस्नायी नराधिप[1] ।
मोक्षोपायमथासाद्य ततो मोक्षमवाप्स्यति[2] ॥१४१८॥

1418. O lord of men, a person who takes bath daily thus for the whole year will obtain the means of getting salvation and then will obtain salvation.

काश्मीरकाणां[3] तीर्थानां फलं ते कथितं मया ।
सकलं नीलवाक्यं च गमिष्यामि सुखी भव ॥१४१९॥

1419. I have narrated to you, all the sayings of Nīla and the merit of all the sacred places of Kaśmīra. I am going. May you be happy.

इदं धार्यं प्रयत्नेन यन्मयाभिहितं तव ।
श्रुत्वैतत् फलमाप्नोति दशगोदानजं नरः ॥१४२०॥

1420. Whatever has been narrated by me to you, should be remembered with effort. By listening to this, a man obtains the merit of the gift of ten cows."

वैशम्पायनः[4]

एवमुक्त्वा स गोनन्दं बृहदश्वो महीपतिम्[5] ।
धर्मात्मा[6] तीर्थयात्रार्थं[7] जगामाभीप्सितां गतिम् ॥१४२१॥

1421. Vaiśampāyana said: "Having spoken thus to the king Gonanda, the pious-minded Bṛhadaśva took his desired route for holy pilgrimage.

---

1. नरः शुचिः G
2. Thus CDE अवाप्यते ABF, अवाप्नुयात् H
3. काश्मीरिकाणां G
4. उवाच add CE
5. नराधिपम् C
6. धर्मार्थी F
7. —यात्रार्थी B, —यात्रार्थे EF

Ed. Leiden v. v. 1363-1366

बहु मेने तथा[1]त्मानं गोनन्दः समरप्रियः ।
स प्रशशास[2] वसुधां राजा[3] शास्त्रानुसारतः[4] ॥१४२२॥

1422. The militant Gonanda also thought highly of himself and ruled over the earth, in accordance with the instructions of the Śāstras.

जनमेजयः[5]

भूयो वितस्तामाहात्म्यं कथयस्व द्विजोत्तम ।
तच्छ्रुत्वैव[6] गमिष्यामि[7] द्विजेन्द्र गतकल्मषः[8] ॥१४२३॥

1423. Janamejaya (said) : "O best among the twice borns, tell me again the glorification of the Vitastā. I shall go after being free from sins by listening to that.

वैशम्पायनः

हरस्य दयिता भार्या सती दाक्षायणी[9] शुभा ।
सैवोमा कथिता राजन् प्राप्ते वैवस्वतेऽन्तरे ॥१४२४॥

1424. Vaiśampāyana (said) ;"O king, it was beautiful Satī, the daughter of Dakṣa and the beloved wife of Hara, who was called Umā in Vaivasvata Antara.

---

1. स च—G
2. सम्यक् प्रशास A, समं प्रशास DFH समंशशास C
3. धरां सम्यक् G
4. राजशास्त्रानुसारतः F, राजा शस्त्रानुसारतः C, धर्मानुशास्त्रतः ed. Leiden
5. उवाच add CDEG
6. श्रुत्वैतत् E
7. भविष्यामि BF
8. गतकिल्विषः H
9. Thus other MSS., दाक्षायिणी A, दाक्षायिनी H

हिमाद्रितनया सैव यमुना पापनाशिनी[1]।
मन्वन्तरान्ते सैवोक्ता नौर्गरिष्ठा जगत्त्रये ॥१४२५॥

1425. The same daughter of the Himādri was the sin-destroying Yamunā and the same was spoken of as the greatest boat in the three worlds, at the end of Manvantara.

कश्मीरा कथिता देवी वितस्ता सैव[2] निम्नगा।
पातालादुत्थिता देवी शूलघातात्[3] तरङ्गिणी[4] ॥१४२६॥

1426. The (same) goddess is called Kaśmīrā and the same is the river Vitastā. The river goddess arose from the Nether world, by means of the stroke of the spear.

स्नातस्य तोये वैतस्ते स्वयमात्मानमात्मना।
विजानाति गताशेषकल्मषाल्लघुभागिनम् ॥१४२७॥

1427. On account of the destruction of all sins after bathing in the water of the Vitastā, one by one's own self knows oneself to be possessed of the quality of lightness.

वितस्तातो महीनाथ न गङ्गा व्यतिरिच्यते ॥१४२८॥
केवलं जाह्नवीतोये पुरुषस्यास्थिसम्भवः।

वितस्तातोऽधिको[5] राजन् स्नानाद्यं तुल्यमेव च ॥१४२९॥

1428-29. O lord of men, the Gaṅgā does not excel the Vitastā. The only thing which the water of the Gaṅgā has

---

1. पापनाशनी A
2. येव A
3. शूलखातात् BEFG
4. Thus C तरङ्गिनी H, अनन्तरम् A
5. अधिकं ABE

more than that of the Vitastā, is the heap of the bones of men. Bath and other things are equal.

भगीरथेन गंगा या पुरा राज्ञावतारिता ।
अस्थिप्लावनकामेन सगराणां[1] महात्मनाम् ॥१४३०॥

तेनेयं कथिता राजन् प्रशस्ता तत्र कर्मणि ।
वितस्ता वै नदी पुण्या सर्वपापहरा शुभा ॥१४३१॥

1430-31. O king, this Gaṅgā was brought down formerly by the king Bhagīratha desirous of deluging the bones of the highminded Sagaras, so she is stated to be famous in that act. The auspicious Vitastā is verily the holy river, remover of all sins.

वैतस्तेन तु तोयेन जठरस्थेन[2] ये मृता ।
सर्वे स्वर्गमनुप्राप्ता यथा[3] ते सोमपायिनः ॥१४३२॥

1432. All those who died with the water of the Vitastā in their bellies, reached heaven like the soma-drinkers.

नयज्ञैर्दक्षिणावद्भिस्तर्पिता देवतास्तथा ।
तृप्तिं समाधिगच्छन्ति[4] यथा च सलिलैश्च तैः[5] ॥१४३३॥

1433. Thc gods are satisfied not so much with the sacrifices accompanied by sacrificial fees as they are with those waters (of the Vitastā).

---

1. सागरानां AH
2. जठरस्थे तु E
3. तथा A
4. समधिगच्छन्ति BCG
5. यथा तत्सलिलैः शुभैः DEFG, यथैतत्सलिलैः शुभैः H

पात्रे तीर्थे तथा काले[1] मिष्टान्नै[2]र्विविधैः कृतैः ।
यथा[3] तृप्यन्ति पितरः[4] श्राद्धैः[5] शुद्धैश्च[6] तैर्जलैः[7] ॥१४३४॥

1434. The Fathers are satisfied just as with various sorts of offerings of sweet food given to proper persons in proper time at holy place, so with those clean waters (of the Vitastā).

नागैर्बहुविधाकारैः सरिद्भिः सततं गतम्[8] ।
तीर्थैर्देवैश्च ऋषिभिर्गन्धर्वैर्यक्षराक्षसैः ॥१४३५॥

अभिगच्छेत् मेधावी जन्मसाफल्यकारणात् ॥१४३६॥

1435-36. The Nāgas of various forms, the rivers, the holy places, the gods,the sages, the Gandharvas, the Yakṣas and the Rākṣasas constantly approach her. The wise (man) should go to her to make his birth a success.

स्नातमात्रं[9] वितस्तायां जानाति वरुणो नरम् ।
जलाधिपेन ज्ञातस्य नरके पतनं कुतः ॥१४३७॥

1437. Varuṇa knows the man who merely bathes in the Vitastā and how can he, who is known by the lord of the waters, fall in hell?

---

1. यथाकाले BEFH
2. सृष्टान्नैः E, मृष्टान्नैः ed. Leiden
3. तथा A
4. तृप्यन्त पितरैः E
5. श्राद्धे EH
6. तद्वच्च G
7. गीतैर्जलैः H
8. संगतिं गताम् G
9. Thus CDE, स्नानमात्रे A, स्नातमात्रो GH

Ed. Leiden v.v. 1378b-1381

पापानां[1] नरके घोरे पततां[2] दुष्कृतात्मनाम् ।
हस्तत्राणप्रदा[3] देवी वितस्ताघनिसूदनी[4] ।।१४३८।।

1438. The goddess Vitastā—destroyer of sins—gives protection with her hand, to the evil-doing sinners falling into hell.

स्वर्गारोहणनिःश्रेणीं[5] मनोरथफलप्रदाम्[6] ।
वितस्तां ये गमिष्यन्ति ते यास्यन्त्यमरावतीम् ।।१४३९।।

हंससारसयुक्तेन चक्रवाकोपशोभिना[7] ।
विमानेनार्कवर्णेन किंकिणीजालमालिना ।।१४४०।।

देवरामागणाढ्येन[8] वीणामुरजनादिना[9] ।

1439-1441a. Those who will go to the Vitastā, the staircase for climbing up to heaven and the giver of the fulfilment of desires, shall go to Amarāvatī, by means of a sky-chariot containing the swans and the aquatic birds (Sārasa), decorated by the Cakravākas, having a colour like that of the sun, garlanded with a net-work of small bells, swarming with a host of heavenly maidens and resounding with the sounds of the Viṇā and the Muraja.

---

1. पापिनां GH
2. पातनाद् A
3. हस्तमात्रप्रदा BEF
4. वितस्ताघविनाशिनी CE, वितस्ता च निसूदनी A
5. निःश्रेणी B
6. प्रदा B
7. चक्रवाकोपशोभितां ABEF, चक्रवाकोपशोभितं C
8. देवासुरगणाढ्येन CE
9. वीणामुरजवादिना ABCEH

पुलिनैर्विविधैर्युक्तां पद्मोत्पलविभूषिताम् ॥१४४१॥
गोकुलारावबहुलां हम्भारावनिनादिताम्[1] ।
मत्स्यकच्छपसंबाधां सुतीर्थां कामदायिनीम् ॥१४४२॥

अमृतस्वादुसलिलां नृणां दृष्टिमनोहराम् ॥१४४३॥
मातेव वरदां[2] देवीमभिगच्छन्ति[3] ये नराः[4] ।
तेऽभिगच्छन्ति राजेन्द्र प्रतिष्ठां भुवि मानवाः[5] ॥१४४४॥

1441b-1444. O chief of the kings, those men obtain fame on the earth, who go to the goddess Vitastā, endowed with various bridges, decorated with blue and red lotuses, filled with the sounds of the herds of the cows, resounding with the bellowing-sounds, full of fish and tortoises, possessed of good bathing places, giver of the desired objects, possessed of the water which tastes like nectar, charming to the eyes of men and boon-giver like a mother.

समुद्ररूपस्य हरस्य भार्यां हिमालयस्याद्रिपतेस्तनूजाम् ।
सुस्वादु[6]तोयामृषिवर्यजुष्टां[7] तां त्वं पवित्रां प्रणमस्व[8] राजन् ॥१४४५॥

1445. O king, pay obeisance to her, the purifying one praised by the high sages, possessed of tasty water, daughter of the Himālaya who is the king of the mountains, and the wife of Hara in the form of the sea.

---

1. Thus ed. Leiden, हस्ताराव—MSS.
2. वरदा H
3. अभिगाहन्ति A
4. येऽभिगच्छन्ति वरदां मातरं वा सुखप्रदाम् G
5. सर्वशः BCE
6. सुखाहु—A
7. ऋषिवर्गतुष्टां A
8. प्रणमामि A

सिन्धुस्त्रिकोटी च तथा विशोका पुण्या नदी[1] हर्षपथा शिवा[2] च ।
पुण्या सुखा चन्द्रवती सुगन्धा पुण्योदका किल्विषनाशिनी च ॥१४४६॥

कूलारणिःपापहरा च कृष्णा नदी सुपुण्या[3] मधुमत्यथापि ।
नदी परोष्णी च तथात्र पुण्या प्रयान्ति दिव्यां[4] वरदां वितस्ताम् ॥१४४७॥

1446-47. The Sindhu, the Trikotī, the Viśokā, the holy and auspicious river Harṣapathā, the holy Sukhā, the Candravatī, the Sugandhā, the sin-destroying Puṇyodakā, the Kūlāraṇi, the sin-removing Kṛṣṇā, the holy Madhumatī and the holy river Paroṣṇī go to the boon-giver and celestial Vitastā.

गङ्गा नदी शम्भुजटाकलापे चन्द्रेण देवेन तथा विभिन्ना ।
प्रोक्ता नृलोके नृप चन्द्रभागा आयाति पुण्यां विततां[5] वितस्ताम्[6] ॥१४४८॥

1448. O king, the river Gaṅgā on the matted hair of Śambhu—torn forth by the god Moon and hence called Candrabhāgā in the human world—comes to the sacred and extensive Vitastā.

तीर्थानि पुण्यानि सरांसि राजन् नद्यस्तडाका विविधाश्च कूपाः ।
आयान्ति सर्वे वरदां वितस्तां त्रयोदशीं भाद्रपदस्य शुक्लाम् १४४९॥

1449. O king, the sacred places, the lakes, the rivers, the tanks, the various types of wells, all these come to the boon-giver Vitastā, on the bright thirteenth of Bhādrapada.

---

1. तथा E
2. शिषा A
3. सुपुष्पा A
4. पुण्यां G
5. सततं BCEF
6. This verse om. G

Ed. Leiden v.v. 1389-1392

कस्यास्ति शक्तिर्नृप तेऽत्र वक्तुं देवीगुणान्वर्षशतैरनेकैः ।
भक्त्या मयोक्तां च निशम्य कांचिद् भक्तिं कुरुष्वात्र सदा नृवीर ॥१४५०॥

1450. Who can be able, O king, to describe to you the merits of the goddess even in several hundred years? Having heard a little which has been narrated by me with devotion, you should be always devoted (to her).

श्रुत्वा वितस्तामाहात्म्यं मुच्यते सर्वकिल्विषैः ।
श्रुत्वा नीलमतं सर्वं दशधेनुफलं[1] लभेत् ॥१४५१॥

1451. Having listened to the glorification of the Vitastā, one is freed from all sins and having heard the whole of the Nīlamata, one gets the merit of (the gift of) ten cows.

इत्येवमुक्तं जनमेजयस्य व्यासस्य शिष्येण[2] महाव्रतेन ।
क्षिप्तं[3]न यद् ग्रन्थगुरुत्वभीत्या[4] समग्रशास्त्रैःखलु भारते वै[5] ॥१४५२॥

सर्वत्र नैतद् विषयोपयोग्यं[6] तदा न चक्रे भगवान् महात्मा ।
अतीव हृद्ये बहुविस्तरेऽपि जनप्रिये[7] भारतपूर्णचन्द्रे[8] ॥१४५३॥

1452-53. Narrated thus to Janamejaya by Vyāsa's pupil who had undertaken a great vow, this was not included

---

1. शतधेनुफलं A
2. श्रीव्यासशिष्येण H
3. ख्यातं H
4. Thus CEF, बहुत्वभीत्या other MSS.
5. सूचितं यत् G
6. ह्युपयोगमेति G
7. जनप्रिय A
8. भारतचन्द्रपूर्णे B

Ed. Leiden v.v. 1393-1396

in the Bhārata lest that should become exhaustive with the inclusion of all the treatises. As it was not useful everywhere, so the high-souled venerable (Vyāsa) did not include it in the most interesting though highly exhaustive Bhārata—dear to the people like the full moon.

इति वितस्तामाहात्म्यम् । समाप्तमिदम् नीलमतम् । शुभमस्तु[1] ।

This is Vitastā māhātmya. This (treatise) named the Nīlamata is complete.

---

1. Thus H, इति नीलमते वितस्तामाहात्म्यम् । समाप्तमिदं नीलमतं नाम । यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न विद्यते । ॥ सं 99 आ. पं. वृ. A, नीलमते वितस्तामाहात्म्यम् B, इति श्री नीलमतपुराणे वितस्तामाहात्म्यं सम्पूर्णम् । इति श्री नीलमतपुराणे सम्पूर्णम् शुभमस्तु सर्वंजगताम् C, इति श्रीनीलमाहात्म्ये वितस्तामाहात्म्यं सम्पूर्णम् । समाप्तम् ॥ F, इति श्रीनीलमते वितस्तामाहात्म्यम् । समाप्तं चेदं नीलमतं नाम पुराणमिति शुभायास्तु लेखक-पाठक-श्रावकाणाम् ! G, इति नीलमते वितस्ता-माहात्म्यम् । इति नीलमतपुराणं सम्पूर्णं समाप्तम् E.

Verse Index to Nilamata Purana

क्ष

ख

ग

घ

च

छ

ज

ड

त

ध

न

प

य

र

ल

श

ष

स

LIST OF SOME IMPORTANT ACADEMY PUBLICATION

Dogri

1. **Dogri Kahavat Kosh** (a selection of 1500 Dogri sayings and proverbs) Interpreted in Hindi by Tara Smailpuri vii Pp 204 Rs. 5.00 (1962)
2. **Ekottarashati** (101 selected poems of Rabindra Nath Tagore) Translated into Dogri verse by Kehar Singh Madhukar xxix Pp. 522 Rs. 8.00 1961.
3. **Dogri Lok Geet Vol. 1** (Dogri folk songs) edited with footnotes by Nilamber Dev Sharma and Kehar Singh Madhukar, xi VIII Pp. 200. Rs. 6.00 (1966)
4. **Dogri Lok Geet Vol. II** (a collection of Dogri Folk songs) edited by N. D. Sharma and K. S. Madhukar xcii Pp. 140. Rs. 3.31.
5. **Dogri Lok Geet Vol. III** (A collection of Dogri Folk songs (with footnotes) edited by Prof. N. D. Sharma and by Shri K. S. Madhukar Pp. 179, Rs. 4.57
6. **Shresht Dogri Kahaniyaan** (a collection of outstanding Dogri short stories) edited by K.S. Madhukar Pp. 79, Rs. 1.90
7. **Dogri Mahavara Kosh** :—A collection of 6,000 idioms and phrases with their equivalents compiled by Shri Tara Smailpuri with foreword and Introduction. Pp. 552, Rs. 8.10
8. **Phool Chambeli Da**:—(A collection of Dogri Folk Tales) edited by Shri Narendra Khajuria Pp. 168, Rs. 3.42

English

9. **An Introduction to Dogri Folk Literature and Pahari Art** :—by Lakshmi Narain and Sansar Chand xi Pp. 170, Rs. 7.22 (1965)
10. **An Introduction to Modern Dogri Literature** by Nilamber Dev Sharma, xiii Pp. 213, Rs. 6.06 (1965)

Hindi

11. **Dutt Kavi** (complete works of poet Dutt) with a critical introduction and appendices by Prof. Gauri Shanker Pp. 532, Rs. 11.25

Kashmiri

12. **Daleela** (a collection of Kashmiri folk tales) Edited by Akhtar Mohi-ud-Din and Pushkar Bhan Pp. 147, Rs. 3.00 (1962)
13. **Sufi Shoeyir Vol. I** (selected poems of four famous Kashmiri mystic poets: Swachhkral, Niama Soeb, Rahman Dar and Ahmad Batwari) edited by Amim Kamil Pp. 216, Rs. 4.83 (1964)
14. **Sufi Shoeyir Vol. II**(Selected poems of five famous Kashmiri mystic poets. Shah Ghafoor Shah Qalander, Rahim Soeb, Wahab Khar and Asad Pare) edited by Mohd Amin Kamil, Pp. 332, Rs. 5.90 (1965)
15. **Kaeshiry Luka Baeth Vol. I** (a collection of Kashmiri folk Songs) by Mori Lal Saqi and Naji Munawar, edited by Ali Mohammed Lone Pp. 345, Rs. 5.09
16. **Kaeshiry Luka Baeth Vol. II** (A collection of Kashmiri Folk Songs) by Shri Moti Lal Saqi Pp. 238, Rs. 4.10
17. **Kulyat-i-Azad** :—(complete works of Abdul Ahad Azad); edited with an introduction by Dr. Padam Nath Ganjoo Pp. 637, Rs. 9.25

Persian

18. **Divan-i-Ghani** (by Mulla Tahir Ghani Kashmiri) compiled by Mohd. Amin Darab and edited with an introduction by Ali Jawad Zaidi Pp. 259, Rs. 7.44 (1964)

Urdu

19. **Kashmiri Zaban Aur Shayiri Vol. I** (a survey of Kashmiri languages and poetry by Abdul Ahad Azad.)Pp. 218, Rs. 5.00 (1959)
20. **Kashmiri Zaban Aur Shayiri Vol. II** (a survey of Kashmiri language and poetry by Abdul Ahad Azad), Edited by Mohd Yusuf Teng. Pp. 489, Rs. 10.00 (1962)
21. **Kashmiri Zaban Aur Shayiri Vol. III** (a survey of Kashmiri language and poetry) by Abdul Ahad Azad Edited by Mohd. Yusuf [illegible] 278, Rs. 5.52 (1963)